RNI No. : DELSAN/2011/38660 ISSN 2321-4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

॥ ओ३म् ॥

तादृशी जायते
बुद्धिर्व्यवसायोऽपि तादृशः।
सहायास्तादृशा एव
यादुशी भवितव्यता॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

स्वयं कर्म करोत्यात्मा
स्वयं तत्फलमश्नुते।
स्वयं भ्रमति संसारे
स्वयं तस्माद्विमुच्यते॥

( चाणक्य-नीति )

卐 वर्षम्-८ 卐 अंकः-८ ( १७६ ) 卐 १६ अक्टूबरः २०१८ तः ३१ अक्टूबरमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## विज्ञानं भारतीयसंस्कृतेः अङ्गमस्ति-महामहिमराष्ट्रपति कोविन्दः

लखनऊ। राष्ट्रपति रामनाथकोविन्दः उक्तवन्तः यत् विज्ञानं प्राचीन कालादेव भारतीय संस्कृतेः अंगोऽस्ति। पूर्वमेव अस्माकं पूर्वजः गणितस्य शूत्र व शून्यस्य अविष्कारः कृतवन्तः हरित क्रान्त्याः प्रारभ्य अन्तरिक्ष पर्यन्तं एवं विज्ञानस्य अविष्कारोऽस्ति। ते उक्तवन्तः यत् यदि अस्मान् भारतं मध्यम आय अर्थव्यवस्था एवं अन्नत औद्योगिकी शक्ति सदृश देशः पश्यामि चेत्




अस्मान् ज्ञानस्य चक्षुः प्रसारितव्यम्। राष्ट्रपति लखनऊ स्थित इन्दिरागाँधी प्रतिष्ठाने अन्ताराष्ट्रिय विज्ञान समारोहस्य उद्घाटनावसरे उक्तवन्तः। ते उक्तवन्तः यत् स्वच्छभारतअभियानः एकः वैज्ञानिक लक्ष्योऽस्ति। मिशन इन्द्रधनुष व आयुष्मान भारत सहित सर्वाः योजनाः विज्ञानेन सम्बन्धितोऽस्ति। वैज्ञानिकाः एतादृश अविष्कारं करोतु येन् मानवस्य कल्याणं भवेत् देशं अग्रसारणे विज्ञानं महत्वपूर्ण भूमिका निर्वाहयति।

अस्मिन्नवसरे केन्द्रिय विज्ञान व प्रौद्योगिकी मंत्री डॉ. हर्षवर्धनः उक्तवान यत् सुक्ष्म तकनीक क्षेत्रे भारत सम्पूर्ण विश्वे तृतीय स्थाने अस्ति। राजयपाल रामनाईक उक्तवान यत् विज्ञानं अस्माकं जीवनं सुन्दर व सरलः निर्मितवान। अस्मिन् विज्ञान समारोहे द्वादस सहस्त्र जनाः भागं गृहीतवन्तः।

---

## समाचरितः राष्ट्रियसंस्कृतसंस्थानस्य स्थापनादिवसः

भारतसर्वकारेण 1970तमे वर्षे अक्तोबरमासस्य 15 दिनाङ्के संस्कृत भाषाप्रचारप्रसाराय राष्ट्रियसंस्कृतसंस्थानं संस्थापितम्। तथा च 2003वर्षे मानितविश्वविद्यालयत्वेन उद्घोषितम्। संस्कृतभाषायाः प्रचाराय राष्ट्रियसंस्कृतसंस्थानं निरन्तरम् उद्यमं विदधाति। आभारतं त्रयोदशः परिसरान्



बिभ्राणस्य राष्ट्रियसंस्कृतसंस्थानस्य अष्टचत्वारिंशत्तमः स्थापनादिवसः 15-10-2018 दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये भव्यतया समाचरितः। कार्यक्रमेस्मिन् मुख्यतिथिरूपेण बनारसकाशीहिन्दूविश्वविद्यालयस्य वेददर्शनसंकायप्रमुखाः आचार्याः कृष्णकान्तशर्ममहाभागाः, विशिष्टातिथिरूपेण तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य कुलसचिवचराः आचार्याः रविशंकर मेनन्-महाभागाः, सारस्वताथिरूपेण त्रिपुराविश्वविद्यालयस्य आचार्याः सीतानाथ डे महाभागाः, अध्यक्षरूपेण राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः आचार्याः परमेश्वरनारायणशास्त्रिमहाभागाः च उपस्थिताः आसन्। राष्ट्रियसंस्कृतसंस्थानं संपूर्णे विश्वे संस्कृतभाषाप्रचारं विदधानः एक एव विशालः विश्वविद्यालयः विद्यते इति आचार्याः कृष्णकान्तशर्ममहाभागाः अवदन्। राष्ट्रियसंस्कृतसंस्थानस्य स्थापने कारणीभूताः सर्वे अपि संम्मान्याः पूज्याः इति आचार्याः रविशंकर मेनन्-महाभागाः स्वाभिप्रायं प्राकटयन्। भारते

शेषभागः द्वितीयपुटे

## पतञ्जलियोगपीठे पञ्चदिवसीय-साधु-स्वाध्याय-संगमस्य भव्यायोजनम्

हरिद्वारम्। पतञ्जलि योगपीठ हरिद्वारे देशस्य शीर्ष विद्वान्सः एवं संतजनेन सह धर्म, देश व समाजस्य विभिन्न ज्वलन्त विषयेषु आधारित पञ्चदिवसीय संगोष्ठी एवं परिचर्चा साधुस्वाध्याय संगमनस्य आयोजनं नभवत्। संतस्य अस्मिन समागमे आचार्य सभायाः गणमान्या सदस्य स्वामी




गोविन्ददेव गिरी जी महाराज, स्वामी परमात्यानन्दजीमहराज, स्वामी स्वामी विश्वेश्वरानन्दजीमहराज एवं देशस्य विभिन्न आश्रयतः समागत साधु सन्तः भागं गृहीतवन्तः। आचार्य सभा एवं पतंजलि योगपीठस्य संयुक्त तत्वावधाने आयोजित अस्यां संगोष्ठ्यां सर्वान् साधुसंत एवं विद्वद जनान् योगऋषि स्वामीरामदेव एवं आचार्य बालकृष्णेन् सह गहन विषये चिन्तनं कृतवान। संगोष्ठ्याः पञ्च दिनेषु प्रथम सत्रे स्वामी रामदेवमहराज एवं स्वामी गोविन्दगिरीजी योगसत्रस्य समये योगस्य विषये उक्तवान।

साधु स्वाध्याय संगमस्य समापन समारोहे राष्ट्रियस्वयंसेवकसंघ प्रमुख मोहनभागवतः साधु सन्त जनानां आह्वानं कृत्वा उक्तवान यत् सर्वकार एवं संगठनस्य स्तरो भवति। परञ्य ते इतः परोऽस्ति। ते धर्म, समाज एवं राष्ट्रस्य उत्थानाय कार्यं कुरू। ते उक्तवन्तः यत् अयोध्यायां राममन्दिरनिर्माण हिन्दुधर्मस्य अस्मितया युक्त प्रश्नोऽस्ति। मन्दिरस्य निर्माणं शीघ्रं भविष्यति। धर्म समाजः संचालयति। साधु सन्त जनानां कर्तव्यमस्ति यत् ते धर्मस्य रक्षा कुरूत। संघप्रमुखः राजनीतिषु स्यक् जनानां चयनार्थं अकुर्वन्।

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः), नवदेहली
नियुक्तिसूचना
नवदेहलीस्थ राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये
अष्टादशी परियोजनान्तर्गते प्रोजेक्ट फेलो पदस्य कृते
प्रत्यक्षसाक्षात्कारो भविष्यति ।
विस्तृत सूचनार्थं कृपया संस्थानस्य जालपुटं पश्यन्तु।
www.sanskrit.nic.in

# मन्दिरनिर्माणार्थं परमहंसदासस्य आमरणानशनप्रारम्भः

अयोध्या। रामजन्मभूमेः मन्दिर निर्माणाय तपस्वी महोदयस्य छावन्याः महंत परमहंसदासः सोमवासरतः अनसनं प्रारम्भः



कृतवान्। प्रयासः अनेक जनोऽपि सम्मिलितो जातः।

अनशन स्थले गत्वा महंथस्य समर्थन कर्तृषु शिया वक्फ बोर्डस्य अध्यक्ष वसीय रिजवी, रामललायाः मुख्यअर्चक आचार्य सत्येन्द्रदास, रघुवंश संकल्प सेवा ट्रस्टस्य अध्यक्ष दिलीपदास त्यागी रामजन्मभूमि मंदिर निर्माण समन्वय समितेः अध्यक्ष आचार्य नारायण मिश्र, मन्दिर आन्दोलनेन् युक्तः वरिष्ट संत एवं वड़ाभक्तामाला मन्दिरस्य महंत कौशलकिशोरदासः, विक्रमादित्य महोत्सव न्यासस्य महासचिव बाबा शिवशंकरदासः संतकरपात्री अपि आसन्।

तदानीमेव अनशनरत महंतस्य स्वास्थयं एवं जीवनं अधिकृत्य चिन्ता अभवत् परञ्च महंत परमहंसदासः सम्पूर्ण दृढ्तया पुनरोक्तं यत् अहं सन्तोऽस्मि, रामाय अस्मि एवं तस्मै जीवनमपि। ते उक्तवन्तः यत् केन्द्रसर्वकारः मन्दिर निर्माणार्थं असक्षमोऽस्ति। ते अल्प दिनस्येवास्ति। अतः प्रधानमंत्री अयोध्यामागत्य रामललायाः दर्शनेन सह मन्दिरनिर्माणस्य तिथिं उद्घोषयन्तु। बकौल परमहंसदास यदि प्रधानमंत्री सतादृशं न कुर्वन्ति तर्हि अहं देहत्यागः करिष्यामि। आमरण अनशनं प्रति समर्थनाय आगत मुख्यार्चक आचार्य सत्येन्द्रदासः उक्तवन्तः यत् रामन्दिर निर्माणाय संकल्पित योगी आदित्यनाथस्य भाषायां इदानीं सरसता नास्ति।

बाबरी मस्जिदस्य प्रतिभागी मो.इकबालः परमहंसदादस्य आमरण अनशनं अनुचितं उक्तवान्। ते उक्तवन्तः इदानी समस्या न्यायालये अस्ति। अस्माषु न्यायालयस्य निर्णणस्य प्रतीक्षा कर्तव्यम्।

# गाँधीजयंती-अवसरे एकविंशतिभारतीयभाषासु काव्यपाठः

नवदेहली। महात्मा गाँधी महोदयस्य 15वीं जयंती अवसरस्यावसरे साहित्य अकादमी माध्यमेन अखिल भारतीय बहुभाषी कवि सम्मेलनस्य आयोजनमभवत, येषु एकविंशति भारतीय भाषाणां कवयः गाँधी वर्षस्योपरि आयोजित काव्यपाठः कृतवान। कार्यक्रमस्य अध्यक्षता साहित्य अकादम्या अध्यक्ष व



कन्नड़स्य साहित्यकारः चन्द्रशेखर कंबार कृतवान। कार्यक्रमस्य विशिष्टातिथि डोगरी साहित्यकारः पद्मासचदेवा आसन्। समापन वक्तव्यं साहित्य अकादम्याः उपाध्यक्ष व साहित्यकार माधवकौसिकः दत्तवान्। अस्मिन्नवसरे विशेष स्मारिकायाः विमोचनमपि अभवत्। तत्र कविनां परिचयः एवं तेषां काव्यानां प्रकाशनमपि अभवत्। अस्मिन्नवसरे साहित्यअकादम्याः सचिव के श्रीनिवासराव उक्तवान् यत् ते सम्पूर्ण समाजं प्रभावितवान्।

विशिष्टातिथि उक्तवती यत् सर्वत्र महिलायाः भूमिका भवेत् इत्येव मम् लक्ष्योऽस्ति। तस्येव परिमाणेऽस्ति यत् महिला सर्वत्र स्व भूमिका निर्वाह्यति। एवं स्व काव्यपाठमपि कृतवती।

मलयालय साहित्यकारः के सच्चिदानन्दनः गाँधी वर्यस्य आदर्शानां परिकल्पनां एकः लेखकस्य दृष्ट्या प्रस्तुतवान। ते तेषां सिद्धान्तानां चर्चा अपि कृतवान्तः।

चन्द्रशेखर कंबारः गाँधी वर्यस्य व्यक्तित्वस्य विषये उक्तवान् यत् ते सम्पूर्ण विश्वं प्रभावितवन्तः। माधवकौसिकः उक्तवान यत् तेषां व्यक्तित्वं तादृशमासीत् यत् तेषां प्रतिष्ठा सम्पूर्ण विश्वे अस्ति।

कार्यक्रमस्य अग्रिम सत्र आंग्लरचनाकारः अरविन्द कृष्णमल्होत्रायाः अध्यक्षतायां सुसम्पनो जातः। तेषु जीवननाराह (असमिया), रश्मिचौधरी (बोडो), धीरेन्द्रमेहता (गुजराती) एवं अन्याषां भाषाणां कवयः गाँधीवर्यस्योपरि काव्यः प्रस्तुतवन्तः। कार्यक्रमस्य संचालनं साहित्य अकादम्याः सम्पादक अनुपमतिवारी कृतवान।






## प्रथमपुटस्य शेषभागः

## समाचरितः राष्ट्रियसंस्कृतसंस्थानस्य ....

विद्यमानाः सर्वा अपि संस्कृतसंस्थाः संस्थानेन संबद्धाः उपकृता च सन्ति इति आचार्याः सीतानाथ डे महाभागाः अवादिषुः। संस्थानस्य संस्थापने कारणीभूतान् सर्वान् स्मरन्तः वयं संस्थानस्य पुरोनयनाय अधिकं श्रमं कुर्याम इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः आचार्याः परमेश्वरनारायणशास्त्रिमहाभागाः उक्तवन्तः। धन्यवादार्पणं राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यापीठस्य निदेशकाः आचार्य रमाकान्तपाण्डेयवर्याः व्यधासिषुः। कार्यक्रमेस्मिन् संस्थानस्य सर्वे अधिकारिणः कर्मचारिणश्च समवेता आसन्।








# संयुक्तहिन्दुमोर्चामाध्यमेन समानजनसंख्याविधेयः याचना

पूर्वी दिल्ली। शाहादरा चौक स्थित युनाइटेड हिन्दु फ्रंट माध्यमेन ललकार सभायाः आयोजनमभवत्। अस्मिन्नवसरे तस्य कार्यकारी अध्यक्ष जयभगवानगोयलः मुख्यवक्ता रूपे आसन्।



गोयलः उक्तवान यत् इदानीं हिन्दु मध्ये विभेदस्य प्रकरणं प्रचलति। एवं राजधानीतः तस्य पलायनयपि अभवत्। ते उक्तवन्तः यत् सर्वकारः प्रधान न्यायालयस्य आदेशस्य पालनं करोति तर्हि सोलमपुर, मुस्तफाबाद, जाफराबाद, ओखला सदृश मुस्लिमबाहुल्य क्षेत्रे मॉनिटरिंग कमेटी सिलिंग एवं विभेद किमर्थ न कारयति सर्वकारं उक्तवान यत् देहल्यां तत्कालेव विभेदं स्थकितं कृत्वा रामन्दिर निर्माणं कारयतु एवं अल्पसंख्यक जनानां कृते यो व्ययं भवति तं विकास कार्ये उपयोगं कुर्वन्तु। सर्वेषां जनानां कृते समान नागरिक जनसंख्या नियंत्रणं कानून सम्यक् रूपे कार्ये आनयन्तु येन् जनसंख्या नियंत्रणं भविष्यति।

सभायां उपस्थित अखिलभारतीयसंतसमिति राष्ट्रिय उपाध्याय स्वामी देवेन्द्रगिरी, स्वामीराजेश्वरानन्दमहराज राजनीशगोयंका, अनिल आर्य, दंडी स्वामी, इंदुआश्रम महराज, युनाइटेड हिंदु फ्रंटतः ईश्वर सिंह, धर्मेन्द्र, बेदी, रमाकान्तशर्मा, नत्थुराम, सुबोधबिहारी विष्णुगर्ग अपि सर्वकारेण हिन्दु जनानां शोषणं विषये उक्तवान।

अस्मिन्नवसरे संजयगोयल, राकेशजिंदल, अजीतअग्रवाल, सरोजशर्मा, जेपीसिंह भगवानाचार्य एवं प्रवीनगोयल आदि पदाधिकारी एवं गणमान्य जनाः उपस्थिताः आसन्।

# एकाग्रता लेखकं साधनायाः पथि आनयति

देहली। लेखकस्य सम्बन्धः एकाग्रतया अस्ति। यो तं साधनायाः पथे आनयति। यस्य मार्गे कोऽपि भेदभावः न वर्तते स एव लेखकः अंदाजा आरामगृहस्य प्रांगणे कलमगुरूग्रामस्य प्रथमायोजस्य मध्ये प्रसिद्ध व्यंगकार प्रेमजन्मेजयेन वार्तालाप समये साहित्यकार नरेन्द्र कोहली उक्तवान। कार्यक्रमस्य अध्यक्षता अराधनाप्रधान कृतवती।



2017 तमे वर्षे पदमश्री एवं इतः पूर्वं 2012 तमे वर्षे व्यासम्मानेन सम्मानि नरेन्द्रकोहली महोदयोपरि एकपञ्चाशत् छात्राः शोध कार्य कृतवन्तः। 1947 पश्चात् रचित हिन्दी साहित्ये तस्य अमूल्य योगदानमस्ति। तेऽपि स्वीकारोति लेखकस्य प्रारम्भः काव्याध्यमेन भवति। परञ्च ते लेखनस्य प्रारम्भ गद्यमाध्यमेन कृतवन्तः। ते प्रेमजन्मेजयस्य वार्तालापे सम्मिलित जनानां प्रश्ने अशुद्धता विषये आलोचना अपि कृतवान। ते उक्तवानः ये अशुद्ध लेखनं कुर्वन्ति ते सरस्वत्याः अपमानं कुर्वन्ति। तेंषा मते वितरनसय परिभाषा अस्ति यत् प्रगाढ़ता कोहली उक्तवान यत् ते आलोचकानां विषये न चिन्तयन्ति। तस्य कारणमस्ति तेषां पार्श्वे प्रकाशन एवं पाठकस्य न्युनतानास्ति। ते हिन्द्यां रामायण, गीता एवं महाभारतस्य अध्ययनं कृतवन्तः। रामस्य कथा अपि लिखितवान। जनाः इश्वरं मानवरूपे चित्रित करणाय विरोधमपि कृतवान परञ्च प्रसन्नोऽस्ति यत् ये रामायणं गीता न पठितवान् तेऽपि तस्याध्ययनं कृतवन्तः।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# पुराणेषु पर्यावरणविज्ञानम्

**डॉ0 माधवी तिवारी**

पुराणेष्वेव पर्यावरणसंरक्षणोपायानां साङ्गोपाङ्गवर्णनमुपलभ्यते। पर्यावरणस्यार्थो भवति यत् परितः आवरणं (परि+आ+वृ+ल्युट्) पर्यावरणम्। अस्माकं भारतीयपरम्परा वेदमूला। अतः तस्यां परम्परायां श्रुतिर्भजति यत्

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्वतः स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम्॥

इति सर्वतस्पृष्टत्वात् सर्वमावृत्य वायुः तिष्ठति स विष्णुर्व्यापक इत्यर्थः। स विष्णुः स्वकीयया मायया सहितो ब्रह्माण्डस्य पर्यावरण सृजति 'तत्सृष्ट्वा तदेवानुप्राविशत्'' इति वचनात् ज्ञायते। श्रीमद्भगवतगीतायां भगवान् श्रीकृष्णः स्वयमेव कथयति–

**'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥2**

तर्हि अष्टधा प्रकृत्या सह यो विष्णुः कृष्णो वा सर्वमावृत्य तिष्ठति, स एव पुराणविद्यया पर्यावरणत्वेन स्वीकृतः। पुराणविद्याविद्भिरवधेयं यत् पुराणेषु पर्यावरणस्य चर्चा हिन्दीभाषायां सम्प्रति प्रचलितात् शब्दात् पर्याप्तं वैभिन्यं धारयति। भारतीया दृष्टिस्तु अद्वैतमतप्रतिपादकम् आदिशङ्कराचार्यमनुसरति। यथा

**'हरिरेव जगत् जगदेव हरिरिति**

तत्राध्यात्मिकाधिदैविकाधिभौतिकभेदेन स्थावरे जगति जङ्गमे चास्मिन् विश्वस्मिन् यत् किञ्चिद् घटते घटनाचक्र तत्सर्वं पौराणिकैः पर्यावरणत्वेन स्वीक्रियते। वर्तमाने प्रचलितः पर्यावरणशब्दस्तु आङ्गलभाषायाः (Environment) शब्दस्यानुवादः। अत्र पर्यावरणशब्देन यत् किञ्चदपि गृहीतं भवति तत्सर्वं केवलं भौतिकजगद्विषये विचारयति, आधिदैविकाध्यात्मिकविषययोः कृते न। यतो हि पाश्चात्त्यानां पार्श्वे केवलं भौतिकी दृष्टिर्विद्यते न परमार्थिकी।

भौतिकजगदधिकृत्य पर्यावरणविषये यच्चिन्तनं तदनुसार वायु–जल–भूमि–वनस्पतिवृक्ष–पादप–पशु–पक्षी मानवश्च सर्वे मिलित्वा पर्यावरणस्य संरचनां कुर्वन्ति। प्रकृतौ एतेषां, समेषां रचना। चैतादृशी व्यवस्थिता येन पृथिव्या उपरि सन्तुलनात्मक जीवनं स्यात्। सृष्टेराम्भकालादेव यदा पृथिव्यां। मनुष्य–पशु–पक्षी–जीवजन्तुनामागमनं जातं तद्दिनादेव प्रकृतिचक्रमिदं नैरन्तर्येणाबाधगत्या प्रचलति। यस्य कृते यावदावश्यकता तस्योपलब्धिर्भवत्येव। तथा च प्रकृतिः भविष्यार्थमप्य् आवश्यकमुत्पाद्य संगोपयति।

अस्मिन् विषये प्राचीन भारतीयचिन्तनं कीदृशमित्यपि विचारणीयम्। भारतीयचिन्तनपरम्परा तु वैदिकी परम्परा अस्या वैदिकपरम्पराया वाहकानि पुराणान्येव। यद्भारतीयं चिन्तनं तत्तु सार्वकालिक, सार्वदेशिक, सर्वजनहिताय, सर्वजनसुखाय च। भारतीयजीवनव्यवस्था सर्वथा प्राकृतिकपर्यावरणानुकूलैव। परन्तु कालक्रमेण यदा समाजे विकार उत्पद्यते तदास्य कथं संरक्षणं स्यादित्यालक्ष्यैव भारतीयमनीषिभिरस्मिन् विषयेऽपि चिन्तितम्। श्रुतिस्मृतिपुराणादिषु सर्वत्र प्राचुर्येणास्य दर्शनं भवति। यथा

**ओ३म् द्यौः शान्तिरन्तरिक्ष शान्तिः पृथ्वीशान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः। शान्तिर्विश्वेदेवाः शान्तिर्बह्मशान्तिः सर्व शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि।**

अस्मिन् मन्त्रे समस्तप्राकृतिकावरणानां शान्त्यर्थं प्रकारान्तरेण पर्यावरणस्य संरक्षणार्थं कामना कृता वर्तते। विविधानां वैदिकयज्ञानामप्येतदर्थमेवं प्राविधानम्। वेदेषु त्रिविधं पर्यावरणमालक्ष्य तत्संरक्षणार्थं च य उपाया निर्दिष्टाः तानेवाख्यानोपाख्यानमाध्यमेनोपदेशरूपेण परलोकसुखप्रलोभनेन भयोत्पादनेन वा पुराणान्युपबृंहयन्ति। अस्ति पुराणसाहित्यमतीव विपुलं पुराणोपपुराणादिभेदैर्ध्यापकञ्च।

यथा पूर्वमेवोक्तं यत् भारतीयावधारणा पर्यावरणविषये सा त्वतिव्यापिका। भारतीया या संस्कृतिः सा मूलतः पर्यावरणस्य संरक्षिका। अस्माकं यत् सांस्कृतिक दर्शनं तस्य समग्रबोधः सहजतया यदि कुत्र भवितुं शक्यते तर्हि तत्तु पुराणेष्वेव। पुराणानुसारं विविधप्राकृतिकानामवयवानां मेलनेन निर्मितं निखिलं ब्रह्माण्डमिदम्। अस्मिन् विद्यमानाः सर्वे जीवजन्तवः वृक्षलतादयः, नानाविधदृश्यादृश्यपदार्थाः शक्तयश्च। अस्य वैविध्यमपि सम्पूर्णताया प्रतीकभूतम् एतेषामेव संघटनेन जगदुद्भूतम्। अखण्डब्रह्माण्डस्य विविधावयवेष्वेकस्यापि क्षतिः नैसर्गिक चक्र खण्डयति न केवलमपितु पर्यावरणावक्रमणसंकटमप्यधिक गाम्भीर्य भयञ्चाभजते।

अद्य तु पर्यावरणसंरक्षणमधिकृत्य सर्वे चिन्तामग्नाः। यतो हि पर्यावरणसंरक्षणाभावे भाविविकासस्यापि जीवनावधिरल्प एव भविष्यति भारते पर्यावरणस्य कृते सम्मानस्य संरक्षणस्य च महनीया परम्परा। अशेषे संस्कृतवाङ्मयस्य ज्ञानं विशेषेणापेक्षितं तत्रापि पुराणानाम्। वाङ्मयेषु वेदाः गुरुतुल्याः, पुराणानि सुहृदसदृशानि, काव्यादयः कान्तासदृशाः। विपदि सृहदकतोद्बोधनं विशेषेण प्रभावोत्पादक भवति। अतोऽस्यामापदि पुराणानामेव योगदानमतीव महत्त्वपूर्णम्। अस्मिन् करालकलिकालेऽपि यदि कुत्रचित् नैतिकवैदिकमूल्यानां दर्शनं भवति तर्हि तत्र पुराणान्येव कारणानि। बहुकालात् वैदेशिकैः प्रताडिता इयं संस्कृतिः पुराणैर्न केवलं संरक्षिताऽपितु स्वोंपकरणैराख्यानगाथाकल्पशुद्धिभिः जनेषु प्रसारिताऽपि। मानसिकपर्यावरणस्य संरक्षणं यथा पुराणोपदेशैर्भवितुं शक्यते न तथाऽन्यसाधनैः। स्वयं सृष्टिकर्ता ब्रह्मणाऽपि तस्य श्रेष्ठत्वं स्वीकृतम्। यथा भागवते–

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्तया।
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्॥
तैस्तैस्तुष्टहृदयपुरुष विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः॥4

अनया बुद्धया एव तस्य श्रेष्ठत्वम। बुद्धिकारणादेव सः प्रकृतिं प्रत्याकर्षितः तस्याः शक्तया च चकितोऽपि। तेन जीवनस्य यथार्थं प्रकृतेरुत्सङ्गेऽन्विष्टम्। प्रकृत्या सह तस्य सम्बन्धः तथैव प्राचीनः यथा सृष्टेरुद्भवविकासस्येतिहासः।

भारतीयपरम्परायां विशेषेण पुराणेषु इयं प्रकृतिः मातृरूपेण स्वीकृता, यस्याङ्क एव प्रथममानवशिशुना नेत्र उद्घाटिते, तस्याः क्रोडे एव क्रीडन् वर्धितः, अन्ते च तस्यालिङ्गनबद्धो भूत्वा चिरनिद्रासु लीनः सञ्जातः। अद्भुतप्रकृतिक्रियाकलापानालक्ष्य तस्य चेतसि भयविस्मयप्रमादिभावाः प्रस्फुटिताः एतदालक्ष्य तस्य मस्तिष्के ज्ञानविज्ञानमयी बुद्धिः प्रादुर्भूता। दार्शनिकदृष्ट्याऽपि प्रकृत्या साकं तस्य सम्बन्धः शाश्वतः चिरन्तनश्च। सद्रूपा प्रकृतिः, चिद्रूपो जीवः। तथाऽऽनन्दरूपपरमतत्त्वानि एतानि मिलित्वा एव सच्चिदानन्दधनं मानवं संपोष्य प्रकृतिस्तं जीवनपथेऽग्रेसारयति।

श्रीमद्भागवते एतादृशस्यैकस्य वृक्षस्य वर्णनं यत्र द्वौ पक्षिणी स्वतः तत्र एकस्तु फलभक्षणे मग्नः किन्त्वपरस्तु द्रष्टा भूत्वा तिष्ठति न तु फलानि खादति–

**सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतो कृतनीडो च वृक्षे।**
**एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान्॥**

एतादृशमेव वर्णनं श्वेताश्वेतरोपनिषदि अपि। अनेन पौराणिकोपनिषद्रूपकेण सृष्टेरेकस्य महासत्यस्योद्घाटन कृतम्। अत्र वृक्षस्याभिप्रायः प्रकृत्या सह वर्तते यौ द्वौ पक्षिणौ तत्र एकः जीवः अपरः परमात्मा च। तत्र जीवात्मा प्रकृत्याः भोक्ता सः तस्य सुस्वादुफलानि भक्षयति। सः विविधप्राकृतिकतत्त्वानां रहस्यानाञ्च ज्ञानमर्जयित्वा तस्य प्रयोगं स्वसुखसमृद्ध्यर्थं करोति। परमात्मा तु केवलं द्रष्टा सृष्टेर्नियामकः परन्तु न तु तस्योपभोक्ता जीवस्तु सदैव प्रकृत्योपरि स्वाधिपत्यं स्थापितुमिच्छति।

पर्यावरणसंरक्षणोपायाः

यस्मिन् पर्यावरणे मानवो निवसति तत्तु प्राकृतिकमेव। तत्र प्रकृत्याः परिवर्तनशीलत्वेन परिवर्तनम्भवत्येव। तथा च तस्याङ्गभूता ये प्राणिनः तेषां पारस्परिकव्यवहारेऽपि परिवर्तनं सञ्जायते। उभयेऽपि परिवर्तने प्राणिनां कृते प्रतिकूलानुकूला वा स्थितिरागच्छति। प्रतिकूलपरिवर्तनं तदैव भवति यदा पर्यावरणस्य हानिः सजायते। एतादृशी या हानिः तां दूरीकर्तुमेव अस्मत्पुराणकारैः विविधोपायाश्चिन्तिताः पर्यावरणसंरक्षणाय। पर्यावरणे यदि प्रकृत्या परिवर्तनं प्रदूषणं वा भवति तदा कालेन शुद्धीकरणञ्चापि प्रकृत्यैव भवति यदा प्रावृट्काले नदीषु समागतेन नूतनवृष्टिजलेन साकं मृत्तिकादिपदार्थानां संयोगेन जलं मलिनं भवति। किन्तु तदेव जलं शरत्काले स्वयमेव शनैः शनैः स्वप्राकृतिक रूपमाप्नोति। परन्तु मानवकृतप्रदूषणस्य निवारणार्थमुपाया अपेक्षिताः। अतः संरक्षणोपाया अपि भागद्वये विभक्तुं शक्यते1. प्राकृतिकसँरक्षणोपायाः, 2. मानवकृतसंरक्षणोपायाः।

1. प्राकृतिक संरक्षणोपायाः–

प्राकृतिकोपायानां करणस्य नावश्यकता। प्रकृतिस्तु स्वयंसिद्धा, सा त्वेतादृशं सन्तुलनं स्वयमेव स्थापयति। यथा– वृक्षाणां बाहुल्ये सति दावाग्निना विनाशोऽपि जायते। मृगादीनां संख्या यदाभिवर्धते तदा। तेषां व्याघ्रादिभिर्विनाशोऽपि भवति। एतादृशं सन्तुलनमकारणमेव प्रजायते प्रकृत्या।।

2. मानवकृतसंरक्षणोपायाः समस्तेषु प्राणिषु मानव एतादृशः प्राणी यः स्वप्रमादात् लोभादिविकाराद् वा पर्यावरण प्रदूषयति। मानवकृतप्रदूषणकारणेषु मानसिकशारीरिकोभयविधकारणानि। प्रामुख्येण मानवः सागरसरितसहितं जलं, वायु, वनवन्यजीवसहितां वसुन्धरामन्तरिक्षञ्चापि स्वविवेकपूर्णकर्मणा प्रदूषयति। अतः एतादृशं वैविध्यपूर्णप्रदूषणं दूरीकरकर्तुं विविधोपायाः विवेचिताः।

प्रथमस्तावत् भूमिप्रदूषणमधिकृत्य विवेचनात्र क्रियते। यद्यपि भूमिजलवाय्वादिभेदानाधिकृत्य वर्गीकरणं भवितुमर्हति तथापि प्राकृतिकघटकानाम् ईदृशः परस्परसम्बन्धः यद् एकस्य प्रदूषणेनान्येऽपि प्रदूषिताः भवन्ति।

विशेषेण प्राकृतिक परिवर्तनं यदा भवति तदा सर्वे घटकाः प्रभाविता जायन्ते। पृथक् पृथक् वर्गीकरणं कृत्वाप्यत्र यत् विवेचनं प्रस्तुतं तस्यानुशीलनेन ज्ञातुं शक्यते यत् एकयैव घटनयानेकानि प्रदूषणानि प्रभवन्ति। तथैव वक्तुं पार्यते यत् एकेनैवोपायेन बहूनां प्रदूषणानां शमनमपि भवितुं शक्यते। यथा जनसंख्यानियन्त्रणेन, वृक्षाणां संरोपणेन च भूमिजलध्वन्यादिनां विभिन्नानां प्रदूषणानां शमनं भवति। वर्तमानसमये पर्यावरणे यत् प्रदूषणं दृश्यते तस्य प्रमुख कारणं जनसंख्यावृद्धिरेव। प्रायः सर्वाणि प्रदूषणानि जनसंख्यावृद्ध्या सम्बद्धानि। अतः प्रथमस्तावत् जनसंख्यावृद्धिनिवारणार्थं य उपायास्तेषामेव विवेचनात्र क्रियते।

**जनसंख्यानियन्त्रणोपायाः**

प्रख्यातशिक्षाविदा दार्शनिकेन बर्टनरसिल महोदयेनैकस्मिन् स्थाने लिखितं यत् विश्वस्मिन् कोऽपि सर्वकारः तावत्पर्यन्तं स्थिरशासनं दातुं न शक्नोति यावद् पर्यन्तं तत्र स्थिरजनसंख्या न स्यात्। निःसन्देह जनसंख्यावृद्धिर्जीवनगुणवत्तामपाकरोति। पर्यावरणे विकृतिर्जनसंख्या वृद्धिकारणादेवायति। एतादृशी भावना पूर्वप्रधानमन्त्रिवर्यया स्वर्गीयया इन्दिरागाँधीमहाभागया 1962 तमे वर्षे स्टॉकहोमनगरे स्वीडनदेशे संयुक्तराष्ट्रसंघेनायोजिते मानवपर्यावरणमाधिकृत्यान्ताराष्ट्रिय सम्मेलने प्रकटिता यत् अधिकजनसंख्या दारिद्रयमामन्त्रयति, दारिद्रयात् प्रदूषणमुत्पद्यते। अतो यद्यस्माकमेतादृशं वक्तव्यं स्यात् यत् विश्वस्मिन् जनसंख्याविस्फोटेन प्रकृतिप्रदत्तानां बहुमूल्यानां पदार्थानां वायुवनस्पतिजलादिनां न केवलं न्यूनता सञ्जाताऽपितु ते प्रदूषिताऽपि। प्रकृतिचक्रमपि लोलितम्। अत्र नास्ति काप्यतिशयोक्ति। अनेन प्रकारेण वर्धमाना जनसंख्या पर्यावरणे विकृतिम् संवर्धयति पर्यावरणसंवर्धने व्यवधानञ्चोत्पादयति पर्यावरणसन्तुलनस्थापनेऽपि विघ्नान्युपस्थापयति। जनसंख्यावृद्धेः पर्यावरणीयप्रभावः–

**जनसंख्यावृद्धिकारणादधोलिखिताः** प्रभावा भवन्ति यथा1. आवासनिवासभोजनादिसदृशप्राथमिकावश्यकतापूर्त्यभावः, 2. वायुजलवनस्पतिसदृशप्राकृतिक संसाधनानां सीमितोपलब्धता। 3. वनानां विनाशः प्राणवायोरभावः, विषवायूनां वृद्धिश्च। 4. प्रदूषणेऽभिवृद्धिः। 5. मानवजीवनस्तरस्यापकर्षः। 6. अत्यधिकः कोलाहलः। 7. अनियन्तित्रजनसम्मर्दः।

**जनसंख्यावर्धनावरोधोपायाः**

यतो हि पुराणानां रचना सर्वजनसुखाय सर्वजनहिताय सञ्जाता। पुराणज्ञैः ऋषिभिर्जनकल्याणेन सम्बद्धः प्रायशः सर्वे विषया न केवलं चिन्तिता अपितु तानधिकृत्य सम्भावितानां समस्यानां समाधनमपि प्रदत्तं वर्तते। यद्यपि प्राचीनकाले पर्यावरणमधिकृत्यैतादृशी समस्या नासीत् यतोहि तस्मिन् समये धर्मेणैव सर्वे परस्परं रक्षन्ति स्म। यथा–

**न राज्यं न राजासीत् न दण्डो न च दाण्डिकः।**
**धर्मेणैव प्रजाः सर्वाः रक्षन्ति च परस्परम्॥**

पुराणेषु हर्यश्वाख्यानम्– इदमतीव महत्त्वपूर्ण पौराणिकमाख्यानम्। अतः प्रायः सर्वाणि पुराणान्यनेनाख्यानेनात्मानम् अलङ्कुर्वन्तीति दृश्यते। भागवतविष्णुपद्मगरुडमत्स्यप्रभृतिवैष्णवपुराणेषु, लिङ्गस्कन्दशिवादिशैवपुराणेषु, ब्रह्मब्रह्माण्डब्रह्मवैवर्तपुराणेषु विष्णुधर्मोत्तरहरिवंशाद्युपपुराणेष्वस्याख्यानस्य चर्चा विद्यते। अस्य हर्यश्वाख्यानस्य चर्चापपुराणेष्वपि मिलति। महाभारतस्य योऽखिलभागो हरिवंशः, यस्य गणनोपपुराणे भवति तत्र यादृशमेतदाख्यानं वर्णितं तस्मिन् किञ्चिद् वैशिष्ट्यं परिलक्ष्यते। यदा दक्षपुत्राः प्रजाविवर्धिषवः, प्रजोत्पादनार्थमुद्यतः तदा नारद उद्बोधयति। यथा–

बालिशा बत यूयं वै नास्या जानीथ वै भुवः।
प्रमाणं स्रष्टुकामाः स्थ प्रजाः प्रचेतसात्मजाः॥
अन्तरुर्ध्वमधश्चैव कथं स्रक्ष्यथ वै प्रजाः॥8॥

अत्र यद्वर्णनं तत्तु महापुराणवर्णनात् किञ्चिद् वैभिन्यं धारयति। अत्र नारदः तान् हर्यश्वान् सृष्टिकार्यात् पूर्वं न केवलं पृथिव्या बाह्य प्रमाणं द्रष्टुं प्रेरयत्यपितु पृथिव्यान्तरोर्ध्वमधश्चापि। अस्य ज्ञानाभावे भवन्तः कथं प्रजाः स्रक्ष्यन्ति इत्युक्त्वा तान् वारयति।

नारदस्यास्मिन् वचने 'अन्तरोर्ध्वमधश्चेति' शब्दत्रयी महत्त्वपूर्णा। मानवानां निवासस्य कृते तु पृथिव्या विस्तार ज्ञानस्य आवश्यकता भवति। नात्र सन्देहः। किन्तु बढ्योऽअन्यावश्यकता यासामवाप्तिर्भूमेरन्तर्भागात् भवति। यथा– खनिजपदार्थः भूमिगतजलमित्यादि।

अत्रोर्ध्वशब्दस्य यत् प्रयोगः तेन तस्य सङ्केतः प्राणवायोरवाप्तिविषये वर्तते। यथा वर्तमानेऽपि पर्यावरणविशेषज्ञा महाप्राणवायुपट्टिकाविषये (ओजोनपर्त) चिन्तिताः दृश्यन्ते। अत्र नारदस्याभिप्रायः प्राणवायुनैव। अस्य पुष्टिरत्राग्रे वर्णितेन श्लोकद्वयेन भवति यथा–

**ते तु तद्वचनं श्रुत्वा प्रयाताः सर्वतोदिशम्।**
**प्रमाणं द्रष्टुकामास्ते गताः प्रचेतसात्मजाः॥**
**वायोरनशनं प्राप्य गतास्ते वै पराभवम्।।**
**अद्यापि न निवर्तन्ते समुद्रेभ्य इवापगा॥९**

रुद्रसृष्टिप्रसङ्गः–जनसंख्यावृद्धिमालक्ष्य पर्यावरणसंरक्षणदृष्ट्याख्यानस्याप्यतीव महत्त्वम्।

सागरोपाख्यानम्– विष्णुधर्मोत्तरपुराण एतदाख्यानं निबद्धं वर्तते। शुनःशेपोपाख्यानम् इत्यादयो विभिन्नः प्रसङ्गाः सन्ति।। सम्यक्कामसेवनम्– पर्यावरणस्य संरक्षणार्थं जनसंख्यावृद्धिमवरोद्धं सम्यक्कामसेवनस्य

**शेषभागःषष्टमपुटे**

# सम्पादकीयम्

अमरभारतीप्रणयिनः सुधियः!

सादरं प्रणमामि।

संस्कृतसंवादस्य नवांको भवतां भवतीनां करकमलेषु समर्पयन्ती सुखमनुभवामि। भवतामेव समेषां सहयोगेन त्यागेन औदार्येण अयं संस्कृतसंवादः संस्कृतजगति प्रसरन् वर्तते। सद्य एवास्माकं देशे यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः इतिमतां देशे भारते नवरात्रपर्वोत्व आयोजितः। नार्यो देव्यो भवन्ति। अतुल्यशक्तिमत्य इमा देशरक्षायै महाकालीरूपमाधृत्य दुष्टान् घ्नन्ति। श्रूयते शुम्भनिशुम्भादयो दैत्याः मात्रैव निहताः। अगणिताः राक्षसाः दैत्यसन्तापकाः देवास्त्रशस्त्रापराजिताः दुर्गादेव्यैव मारिताः इति विदन्ति विज्ञाः। मातृशक्तिबोधकं पर्व इदं भारतीयसंस्कृतेः परिचायकमस्ति। भारतीया वयं नवरात्रं यावत् मातुर्दुर्गायाः नवरूपाणां ध्यानं कुर्मः, तत्पूजनमपि श्रद्धाभावेन कुर्वन्तो निजाभिलाषं पूरयितुं मातरं प्रार्थयामहे।

मित्राणि! मम मतेन इदं पर्व इदमपि बोधयति यत् यदा पुरुषाः सृष्टिरक्षार्थमक्षमा भवन्ति तदा इयं दनुसंहारिणी लोकरक्षिणी वात्सल्यमयी मातेव सर्वान् रक्षति। अतः अस्माभिः हृदयेन नार्यो बालिकाश्च पूजनीयाः रक्षणीयाः। अधुना दैत्यसमानाः केचित् विचरन्ति भुवि नारीसम्मानहारिणस्ते तु अवश्यमेव दण्डनीयाः। येन न कदापि केचचिदपि काचित् पुत्रिका पीडिता स्यात्। बहवः साम्प्रतमपि कन्याभ्रूणं प्रति समुचितं विभावयन्ति। येन लिंगानुपातः क्षीयते। विचारयन्तु नवरात्रान्ते कन्यापूजनं प्रायशः सर्वैरपि विधीयते। यदि कन्यका जनिं न लप्स्यन्ते तदा पूजनस्य कन्यापूजनं कथं सम्पत्स्यते। इयं सृष्टिः कथं वा अग्रेसरिष्यतीति। अतः कन्यां रक्षत कन्यां पाठयत इति मदीयं समुद्घोषो वर्तते। अस्तु मातृशक्तिर्विजयतामिति निगदामि।

## वेदामृतम्

**(ऋग्वेदभाष्यम्)**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**इह त्वष्टरमग्रियं विश्वरूपमुप ह्वये।**
**अस्माकमस्तु केवलः ॥१०॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को अनन्त सुख देनेवाले ईश्वर ही की उपासना करनी चाहिए, तथा जो यह भौतिक अग्नि सब पदार्थों का छेदन करने, सब रूप, गुण और पदार्थों का प्रकाश करने, सब से उत्तम और हम लोगों की शिल्पविद्या का अद्वितीय साधन है, उसका उपयोग शिल्पविद्या में यथावत् करना चाहिए ॥१०॥

वह अग्नि किससे प्रज्वलित हुआ इन कार्यों को सिद्ध करता है, इसका उपदेश अगले मन्त्र में किया है–

**अवं सृजा वनस्पते देव देवेभ्यो हविः।**
**प्र दातुरस्तु चेतनम् ॥११॥**

अर्थ-मनुष्यों से पृथिवी तथा सब पदार्थ जलमय युक्ति से क्रियाओं में युक्त किये हुए अग्नि से प्रदीप्त होकर रोगों की निर्मूलता से बुद्धि और बल को देने के कारण ज्ञान के बढ़ाने के हेतु होकर दिव्यगुणों का प्रकाश करते हैं॥११॥

इस क्रियाकाण्ड को मनुष्य लोग किस प्रकार से करें, सो उपदेश अगले मन्त्र में किया हैस्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे। तत्र देवाँ उप ह्वये॥१२॥

अर्थ-मनुष्य लोग विद्या तथा क्रियावान् होकर यथायोग्य बने हुए स्थानों में उत्तम विचार से क्रियासमूह से सिद्ध होनेवाले कर्मकाण्ड को नित्य करते हुए और वहाँ विद्वानों को बुलाकर वा आप ही उनके समीप जाकर उनकी विद्या और क्रिया की चतुराई को ग्रहण करें । हे सज्जन लोगो ! तुमको विद्या और क्रिया की कुशलता आलस्य से कभी नहीं छोड़नी चाहिए, क्योंकि ऐसी ही ईश्वर की आज्ञा सब मनुष्यों के लिए है॥ १२॥

इस तेरहवें सूक्त के अर्थ की अग्नि आदि दिव्य पदार्थों के उपकार लेने के विधान से बारहवें सूक्त के अभिप्राय के साथ संगति जाननी चाहिए।

***यह तेरहवाँ सूक्त और पच्चीसवाँ वर्ग पूरा हुआ।***

# सद्य आजीविकाप्रदायिनी बृहत्संहिता

-बी.अशोक
शोधच्छात्रःराष्ट्रीय संस्कृतसंस्थान,
नईदिल्ली

**सर्वैः सह सर्वेषांविकास**

इत्युद्घोषणांप्रतिमोदीसर्वकाराः सर्वान् प्रति कृतसंकल्पकटिबद्धास्ति। एतस्य जीवन्तंप्रमाणंकेभ्यश्चनमासेभ्यः पूर्वंप्रगतिमैदानेदेहल्यांसम्पन्ना धूपगन्धवर्त्तिकासुगन्धद्रव्याणांमेलास्ति। एतांमेलामहमप्यगच्छम्। यत्र विश्वस्यानेकेभ्यः देशेभ्यआगतानांकम्पनीनाम् आपणाः सुगन्ध मय-वातावरणेसुसज्जिताः आसन्। तत्सुगन्धमयवातावरणं दृष्ट्वा मममनस्युद् भावितजिज्ञासावाशाद् तत्रस्थ-आपणिकान्अपृच्छं यत् यः सुगन्धआगच्छति सःप्राकृतिकपदार्थैः निर्मितउतकृत्रिमपदार्थैः?अनेकेउत्तरन् यत् कृत्रिमः (सिन्थेटिक–केमिकल)इति। सिन्थेटिक शब्दश्रवणमात्रेणैवकोऽपिप्रसन्नो न भवति।यद्यपि अप्रसन्नोभूत्वाहमचिन्तयंयत्पूर्वकालेजनाः कीदृशानांसुगन्धपदार्थाणांप्रयोगंकुर्वन्ति स्म इति? यावदहंसंस्कृतविज्ञानमुपरिदृष्टिपातंकृतवान्तावदहमेकमद्भुतंग्रन्थंप्राप्तवान्। या वराहमिहिरेणविरचिताअष्टोत्तरष्ठाताध्यायात्मिकाबृहत्संहितावर्तते। यस्याः अन्यतमोऽध्यायः सप्तत्रिंशच्छ्लोकात्मकोगन्धयुक्तिर्नामवरीवर्तते। यस्मिन् धूपवर्तिकायाः सुगन्धद्रव्यस्य च निर्माणविधेःसम्यकतयाविस्तीर्णेनवर्णनंविहितम्। यःसिन्थेटिकइत्यस्यकृतेविकल्पोभवितुं शक्नोति। तेषुकेचननिम्नलिखिताः सन्ति।

**A) धूपवर्तिकाः**

धूप-निर्माणविधिशास्त्ररूपेणसर्वप्रथमेनवराहमिहिरस्यबृह-संहितैवसमुपलभ्यते।आयुर्वेदशास्त्रेषु धूम्रस्यप्रयोगःविविधरोगेषुप्रयुज्यतेपरंसुगन्धधूम्रस्य नास्ति। बृहत्संहितायामेव धूपस्य निर्माणविधिरुक्तः।अत्र अनेके धूपाः प्रोक्ताः। ते यथा

**1) पिण्डनामको**

**धूपः**-आचार्यवराहमिहिरस्य मतेसामन्यतो धूपनिर्माणेगुग्गुलु नेत्रबाला, लक्षा, मुस्ता नख शर्करा च इत्येतेज़ांद्रव्याणंचूर्णस्य परस्परंमेलनेन धूपोभवति। अयं च धूपः सामान्यप्रकारकोभवति।परं एतैः द्रव्यैः सहजटामांसी, बालक(नेत्रबाला) नखांचन्दनंतुरुष्क (सिद्धक)इतिएतेषांद्रव्यानाम्संयोगेनपिण्डोनामक धूपोभवति यथाआचर्योवदति।

**''गुग्गुलुबालकलाक्षामुस्तक नख शर्कराः क्रमाद्धूपः।**
**अन्योमांसीबालकतुरुष्कनखचन्दनैः पिण्डः॥09/77/बृ०सं०**

**2) कोपच्छन्दोनामनरेन्द्र धूपः** सितः शैलेय मुस्ता च इत्येतेषांचतुर्थभागशं,श्रीवासः,सर्ज, नखं,गुग्गुलु च इत्येतेषांतृतीयांशभागंचूर्णगृहीत्वाकर्पूरेणसहमेलनंकृत्वा मधुना युक्तो योपिण्डोभवति सःकोपच्छन्दोनामनरेन्द्र योग्यो धूपअर्थात् श्रेष्ठ धूपोभवति। आचार्योवदति-

**भागैश्चतुर्भिः सितष्ठैलमुस्ताश्रीसर्जभागौनख गुग्गुलुच।**
**कर्पूरबोधो मधुपिण्डितोऽयं कोपच्छन्दोनामनरेन्द्र धूपः॥ 11/77बृ०सं०**

**3) अनेके धूपाः** हरीतकी, शंख,घन (नख), द्रव (बोल),अम्बु (नेत्र बाला),गुड, कूट, शैलक, मुस्तकइत्येतेषांनवद्रव्याणांचूर्णगृहीत्वाक्रमशः पादवृद्धिंकृत्वामेलनंकुर्मः तदाबहुप्रकारकमनोरम धूपानांनिर्माणंभवति। यथा-

**हरीतकी शंख घनद्रवाम्बुभिर्गुडोत्पलैः शैलकमुस्तकान्वितैः।**
**नवान्तपादापिविवर्धितैः क्रमाद् भवन्ति धूपाबहवोमनोहराः॥**
**10/77 बृ०सं०**

<u>**गन्धार्णवः**</u> आचार्यवराहमिहिरेणसुगन्धस्य ये प्रकाराउक्तास्तेविश्वायाश्चर्यकरंभवन्ति।गन्धार्णवः अर्थात् गन्धोनामसुगन्धः। अर्णवोनामसमुद्रइतिपरमत्र बहुत्वेर्थेविद्यते। विशिष्टद्रव्याणांन्यूनाधिक संयोगेनअसंख्यक गन्धद्रव्याणांनिर्माणंभवितुं शक्नोतीतिआचार्यस्य आशयः। गन्धार्णवनिर्माणेषोडेश एव द्रव्याःभवन्ति। तत्रापिचतुर्णांचतुर्णांद्रव्याणांन्यूमाधि कमात्रेणमेलनंकृत्वाअसंख्यगन्धार्णवस्य निर्माणंभवति।तेविशिष्टाःद्रव्याः निम्नलिखिताः सन्ति।

(1) घन (मोथा) (2) नेत्रबाला (3) शैलेयकः (4) कर्पूरः (5) उशीर (खस) (6) नाग (7) व्याघ्रनखः(समुद्रफेन) (8) स्पृक्का (9) अगुरुः (10) मदनकः (11) नख (12) तगरः (13) धान्यः (14) कर्पूरः (15) चोरकः (16) श्वेतमलयम्।

यथा-

**घनबालकशैलेयककर्पूरोशीरनागपुष्पाणि।**
**व्याघ्रनखस्पृक्कागुरूमदनक नख तगरधान्यानि॥13/77|बृ०सं०**
**कर्पूरचोलमलयैः स्वेच्छापरिवर्तितैष्ठचचतुर्भिरतः।**
**एकद्वित्रिचतुर्भिभागैर्गन्धार्णवोभवति॥14 /77बृ०सं०**

एवं च एतैः द्रव्यैःपरस्परन्यूनाधिक मेलनंकृत्वाबृहत्संहिताकारः गन्धार्णवस्य संख्यां लक्षंचतुःसप्ततिःसहस्रंविंष्ठात्यधिकःसप्तशतं संख्यांगणयति। यथा-

**अत्र सहस्रचतुष्टयमन्यानि च सप्ततिसहस्राणि।**
**लक्षं शतानिसप्तविंशतियुक्तानिगन्धानाम्॥ /17/77/बृ०सं०**

अत्र नखंत्यक्त्वापिगन्धार्णवस्य निर्माणंकर्तुं शक्यते।

अद्यत्वेगन्धवर्तिकायाः धूपवर्तिकायाःनिर्माणेआचार्येणोक्ताः द्रव्याः न युज्यन्ते।गन्धवर्तिकायाः निर्माणेपञ्चशः एव द्रव्याः युज्यन्ते। यथा[1]- श्वेतचन्दनं, राल, काष्टोत्पलोगुग्गुलु चइत्येतेषांचूर्ण युज्यते। धूपवर्तिकायाःनिर्माणेश्पिसीमितपदार्थाः युज्यन्ते। यथा- धूपकाष्टः, गुग्गुलु, मलयम्, अगरुः, बालछड़, तगुरुःकर्पूरः घृतमित्यादयः।

<u>**सुगन्धतैलम्**</u>

आचार्येणराज्ञे अनेकप्रकारानिसुगन्धतैलानिप्रोक्तानि। एतानांसुगन्धतैलानांनिर्माणंकृत्वाविक्रयणंकर्तुंशक्यते। तानिनिम्नलिखितानिसन्ति।

**1) चम्पकपुष्पगन्धतैलम्।**

तैलस्यास्यनिर्माणाय मञ्जिष्ठा, व्याघ्रनखः, शुक्तिः, त्वच्,कूटः,बोलइति एतेषांपदार्थानांचूर्णगृहीत्वातैलेन युक्तंकृत्वासूर्यातपेतप्तेसतितत्तैलंचम्पकपुष्पसुगन्धवद् भवति।

यथा-

**मञ्जिष्ठाव्याघ्रनखेन शुक्त्यात्वचासकुष्ठेनरसेनचूर्णः।**
**तैलने युक्तोऽर्कमयूखतप्तः करोतितच्चम्पकगन्धि तैलम्॥**
**16/77/बृ०सं०**

**2) स्मरोद्दीपनतैलम्**

तैलस्यास्य निर्माणाय तेजपत्रंसिंहकः, नेत्रबाला, तगुरुइत्येतेषांचूर्णंतैलेसम्मील्य सूर्यातपेतप्तः स्यात् तदातत्तैलंकामोद्दीपकोभवति। यथा-

**तुल्यैः पत्र तुरूष्कबालतगरैगन्धिः स्मरोद्दीपनः। /77/बृ०सं०**

**3) मौलसिरीपुष्पगन्धतैलम्**

पूर्वोक्तद्रव्यैः सहव्यामकटुकाहिङ्गुः इत्येतेषांचूर्णंतैलेमेलनंकृत्वाआतपेतप्तः स्यात् तदातत्तैलंमौलसिरीपुष्पगन्धि तैलंभवति।

यथा-

**सव्यामोवकुलोऽयमेवकटुकाहिङ्गुःप्रधूपान्वितः।**

**4) नीलकमलपुष्पगन्धतैलम्**

तैलस्यास्य निर्माणाय पूर्वोक्तद्रव्यैःसहकूटचूर्णस्यसंयोगंतैलेकृत्वा-आतपेतप्तः स्यात् तदातत्तैलंनीलकमलपुष्पगन्धवद् भवति।

**कुष्ठेनोत्पलगन्धिकः**

**5) चम्पकपुष्पगन्धतैलम्**

पूर्वोक्तद्रव्यैः सहमलयस्य चूर्णंतैलेमेलनंकृत्वाआतपेतप्तः स्यात्तदातत् तैलम् चम्पकपुष्पगन्धवद् भवति। यथा-**समलयः पूर्वोभवेच्चम्पको।**

**(6)अतिमुक्तकपुष्पगन्धि तैलम्**

पूर्वोक्तद्रव्यैः सहजाती, त्वक्,कुस्तुम्बुरू इत्येतेषांचूर्णंतैलेमेलनंकृत्वाआतपेतप्तः स्यात् तदातत् तैलंअतिमुक्तकपुष्पगन्धि तैलम् भवति। यथा-

**जातीत्वक्सहितो ऽतिमुक्तकइति ज्ञेयः सकुस्तुम्बरुः।**
**7/77/बृ०सं०**

बृहत्संहितयामेताननतिरिक्तंअन्येअनेकेउत्पादाःभवितुं शक्नुवन्ति। यथा-

**पुटवासः**

अद्यत्वेवस्त्राणिसुगन्धिकराणाय द्रव्यानां(सेंट)प्रयोगः भवति।एतस्य विकल्पम्आचार्य एवंवक्ति।त्वक्, उशीर, पत्र इति एतेषां एकैकभागंसूक्ष्मैलायाः अर्धभागंचूर्णं च मेलनंकृत्वा एतंचूर्णमृगकर्पूरप्रबोधने कृतेश्रेष्ठपुटवासोभवति। प्रबोधनंनाम शुष्कचूर्णानांमेलनंभवति। येनवस्त्राणिसुगन्धमय युक्तानिभवन्ति। यथा-

**त्वगुशीर पत्र भागैः सूक्ष्मैलार्धनेसंयुतैश्चूर्णः।**
**पुटवासप्रवरोऽयम् मृगकर्पूरप्रबोधनेन॥/12/77/बृ०सं०**

**मुखवासः (Mouth Fresh) इतिपदार्थस्य**निर्माणंकर्तुं शक्नुमः **दन्तकाष्ठः**आचार्येणोक्तैः द्रव्यैर्दन्तपेस्ट (Toothpaste)इतिपदार्थस्यनिर्माणंकृत्वाविक्रयणंकर्तुं शकनुमः।

अद्यत्वेकुलीनजनाः प्राकृतिकोत्पादान्इच्छन्तितेषां-चान्वेषणंकुर्वन्ति। एतेउत्पादाः तेभ्यंःउपकारकाः भविष्यन्तीतिमेआशा। अद्य सर्वैर्जनैः सर्वकारस्य वर्शत्तिःप्राप्तुं न शक्यते।अतः केचनवर्षत्तिमिच्छुकाःजनाबृहत्संहितां-पठित्वाएतेषांवस्तूनांनिर्माणंविधायविक्रयणंकर्तुं शक्नुवन्ति। अद्यत्वेइदंकार्यंकोटिशरूप्यकेषुभवति।इदंकार्यं आजीविकयाः कृतेसम्यक् भविष्यति।इदंकार्यंकृत्वाल्पसमय एव धनिनः भवितुं शक्नुमः। मयात्र दिङ्मात्रमेवलिखितम्। अनेनकार्येणसर्वेषांस्वर्तिर्भविष्यतीति।वयंप्रधानमन्त्रिमोदीमहोदयस्य कार्येसहायका एव भवाष्यामइतिमेआशा।

**(Footnotes)**

1.स्मालस्केलइण्डस्ट्री, लेखक-कालीचरण्, पृ॰ 494

# स्कन्दपुराणे तीर्थवर्णनावसरे अतिशयोक्तयः।।

डॉअरविन्दकुमारतिवारी

अशेषलोकप्रकाशनक्रियासु रतं निरतं समर्पितवैभवमिति भारतमर्थाद् अस्माकं श्रद्धेयो भारतदेशो यो हि भगवच्चरणपुण्डरीकप्रचुरपरागपूरितपावनभूमिभागो निजास्तिक्यभावनां पालयन् सांख्यपुरुष इव प्रकशतिपरायणोऽसंख्यपवित्रतीर्थस्थलहृदयो दश्श्यते। सर्वधर्मावलम्बी किन्तु सनातनधर्ममार्गगामी निहिताखिलतीर्थविग्रहो देवानपि स्वभूमौ जन्मग्रहाय निवासाय आकर्षति।

मान्याः! तीर्थवर्णनं सविस्तरं पुराणेषु काव्येषु चौपलभ्यते। अधुनाहं स्कन्दपुराणमनुसश्त्य तीर्थवर्णनविषये किंचित् वदामि। यद्यपि अतिशयोक्तिरलंकारस्तथापि नैतादश्शोऽलंकारो यदा कदा धारणीयो येन काचित् क्षतिर्भवेत्।

अष्टादशपुराणेषु स्कन्दपुराणं विशालकायं दश्श्यते। यथा पुराणानां वर्ण्यविषयो भवति तद्वदत्रापि प्राप्यत एवेति। अस्य पुराणस्य परिशीलनेन प्रतीयते पुराणस्य माननीयो रचनाकारो व्यासोपाधिमान् विद्वान् अतिशयोक्तिवर्णने रुचिमान् वर्तते। यद्यपि पुराणेऽस्मिन् बहूनि तीर्थानि तथाप्यत्र द्वितीयवैष्णवखण्डस्थवेंकटाचलमाहात्यवर्णने यत् तीर्थवर्णनं लभ्यते तस्यैव परिशीलनमत्र क्रियते। मान्याः! अत्र षट्षष्टिकोटिसंख्यकानि तीर्थानि वर्तन्ते येषु षडेव तीर्थानि प्रमुखानि गणितानि। अत्र भगवान् वराहो धरण्या पृष्टो ब्रूते। यथा–

षट्षष्टिकोटितीर्थानि पुण्येऽस्मिन् भूधरोत्तमे।
तेषु चात्यन्तमुख्यानि षट् तीर्थानि वसुन्धरे।।1

षट्षष्टिकोटितीर्थानीति पदमेव अतिशयोक्तिं सूचयति। हन्त! कथमिदमुक्तमिदं भगवान् व्यास एव ज्ञापयितुं शक्तः। किमर्थं तीर्थकल्पनं कृतं शास्त्रकारैरिति ज्ञातव्यम्। यतोहि निप्रयोजनं न कश्चिदपि क्वचित् प्रवर्तते। श्रूयतां मदीयं वचनम्–

शान्तिं वितन्य हृदये व्यथिते प्रतप्ते
चित्ते ह्यलौकिकसुखानुभवं ददानम्।
तीर्थं च साधुजनदर्शनजन्यबोधात्
वैराग्यरागमधुरं कुरुते न कं कौ।। 2
यत्रत्यभिक्षुकदलं किल शिक्षमाणं
वित्ते न तश्प्यति जनोऽखिलजीवनेऽपि।
तत्रत्यसज्जनमतं मनुजं प्रभावि
त्यागं प्रबोधयति तीर्थगतं न कंचित्।।
तत्रत्यवासिजनतानववेशभूषा–
भाषादिबोधनमहो परिवर्धकं तत्।
भौगोलिकं नवलदश्श्यमिहागतं कं
हृत्वा तनोति सहसा नवजीवनाशाम्। 3

अत्रैव कलियुगे सेवनीयं वेंकटाचलं स्तूयते यस्य माहात्यं प्रवदन् वराहो देवः भाषते–

योजनानां सहस्रान्ते द्वीपान्तरगतोऽपि वा।
यो नमेद् भूधरेन्द्रं तं तदुद्दिश्य च भक्तितः।।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति।। 4

अर्थवादपूर्णमतिशयोक्तिं द्योतयदिदं पद्यं विस्मयं तनोति मानसे! श्रूयतां सर्वपापविनिर्मुक्तस्सन् विष्णुलोकं स जनः प्रयाति यो बहुदूरादपि भक्तिपूर्वकं वेंकटाचलं नमतीति। अत्र चिन्त्यते कथं केन वैतत्सम्भवति? नाधुनिकः समाजः शिक्षितो वा जन एतन्मन्तुमुत्सुको दश्श्यते। मतिमन्तस्तु जनाः पण्डितानां जल्पनमिदं कथयन्ति। न मादश्शो जनोऽस्य समुचितं समाधानमाविष्कर्तुं प्रभवति। भवन्त एव कुर्वन्तु समाधानमस्येति मम निवेदनम्। चिन्त्यतां समग्रमिदं वचनमतिशयोक्तिपूर्णमेव मन्यताम् अस्यातिशयार्थवादत्वादिति। प्रसंगेऽस्मिन् तुम्ब–पाण्डव–देव–पापनाशनतीर्थानि वर्णितानि येषाम् अतिशयोक्तिपूर्णं प्रशसनं मामेव न केवलं स्वल्पज्ञमपि पीडयतीव। श्रूयतां मनस्विनः!!

पाण्डवतीर्थप्रशंसावचनम्।

तीर्थे स्नाति नियमाद् भूधरेन्द्रस्य मस्तके।
कोटिजन्मार्जितैः पापैर्मुच्यते स नरोत्तमः।। 5

हन्त! पाण्डवतीर्थे यः स्नानं करोति स कोटिजन्मसु कश्तेभ्यः पापेभ्यो मुक्तिं लभते। किमिदं पण्डितानां तीर्थवासिनां कश्चन नूतनमाविष्करणम्? दार्शनिकाः समाजरक्षणं कुर्वन्तोऽनियन्त्रितजनान् नियमयन्तो भाषन्ते ''नाभुक्तं क्षीयते कर्म कश्तं कल्पशतैरपि।'' परन्तु पौराणिका अनियन्त्रिमुखा व्यर्थं सार्थकमिति प्रसार्य वदन्तोऽवलोक्यन्ते। कोपो वा क्रियतां मयि न कापि क्षतिः, कावश्यकता विवशता वा पुराणे एवंविधस्य प्रजल्पनस्येति मे वक्तव्याशयः। यदि एवं स्याच्चेत् न कदापि संसारात् पापाचरणक्षयो भविष्यतीति ज्ञायताम्। अग्रे विलोक्यताम्।

देवतीर्थप्रसंगे तु रचयित्रा स्वलेखनीबलं प्रदर्शयता लिखितम्।

यानि कानि च पापानि ज्ञाताज्ञानकश्तानि च।
तानि सर्वाणि नश्यन्ति देवतीर्थेऽतिपावने।। 6
पुण्यानि च प्रवर्धन्ते देवतीर्थनिमज्जनात्।
दीर्घायुरवाप्नोति पुत्रपौत्रसमन्वितः।।
अन्ते स्वर्गं समासाद्य चन्द्रलोके महीयते।। 7

अत्र ध्यातव्यं विशिष्टं पदं ''ज्ञाताज्ञातकश्तानि'' किमिदं भारतीयाचारविचारशिक्षणतत्परसंस्कश्तस्य सम्मानमपमानं वैतत्। अस्माभिः सगर्वमुच्यते यत् संस्कश्तमेव सर्वश्रेष्ठमिति। किं तीर्थे निमज्जनात् स्नानात् सम्भवं न कदापि। मन्ये तीर्थानि तत्रागतं पावयन्ति सद्विचारं शिक्षयन्ति मौनमादधानानि। परन्तु यादश्शं स्कन्दपुराणे लिखितं न तादृशं फलं मन्तुं शक्यते। एतन्मम मतम्।

अयि! सुजनजनचित्ताहरणकुशला विबुधाः! श्शण्वन्तु वेंकटेशमहिमानं वर्णयता तु श्रीमद्व्यासेन यदुक्तं तत्कथनमिदम्। अहो वचनमिदं कथयता मया तूष्णीं भाव्यमेव। अगणिता देवाः, असंख्यकानि तीर्थस्थानानि, अपरिमितानि मन्दिराणि किं चाष्टादशपुराणानि तत्र वर्णितानि विपुलानि कश्त्यानि दान–श्रवण–मनन–सेवनानि। किं कश्चिद् यदि वेंकटेशदेवं न द्रष्टुं याति पश्यति वा स जनः संकरो ज्ञेयः? हन्त! स्कन्दपुराणस्य वचनमेतत् श्रूयताम्।

वेंकटेशं परं देवं यः कदापि न पश्यति।
संकरो स तु विज्ञेयः न पितश्बीजसम्भवः।। 8

अत्र संकरमिति पदं तु चिन्तनीयमेव न पितश्बीजसम्भव इति पदमपि ध्यातव्यम्। पुराणे मम श्रद्धा न वर्तत इति न मन्तव्यं, किं तु एतादश्शं वचनं मां पीडयति।

महनीया विद्वांसः! किमिदं पुराणवचनं न कस्यचिदुन्मत्तस्य वचनमिवाभाति? यदि माहात्म्यं वर्णनीयं तदा एतादश्शी भाषा अतिशयोक्तिपूर्णा किं च निन्दनीया कथं प्रयुक्ता? आश्चर्यमिदमवलोक्य पुराणं पठतो मम। किं चाग्रे श्रूयतां यछ्रुत्वा मनो मे विकलीभवत्येव।

इतोऽग्रे यद् प्रवदामि तज्ज्ञात्वा महदाश्चर्यानुभूतिः सहृदयानामवश्यमेव भविष्यतीति प्रतिजाने। श्रोतव्यम्।

वेंकटाचले पापविनाशनतीर्थं निरूपयता दश्ढमत्याख्यशूद्रवश्तान्तो दश्ष्टः। एतदनुशील्य मदीया वाणी मुखरा सती मां मुखरीकरोति। इदं ब्राह्मणानां दुष्कश्तमेव यत् पुराकाले तैर्विहितम्, यस्य फलमास्वादयामो वयमिदानीम्। दश्ढमतिर्नाम शूद्रः वैदिकं ज्ञानमवाप्तुमागतः प्रणम्य कुलपतिं न्यवेदयत्–

तपोधन! नमोऽस्तु ते रक्ष मां करुणानिधे।
तव प्रासादादिच्छामि यागं कर्तुं प्रसीद मे।। 9

दश्ढमतिना समादरपूर्वकं पृष्टः कुलपतिस्तस्य प्रार्थनां न स्वीचकार, तेनोक्तम्, यत् –

यागे दीक्षयितुं शक्यो न शूद्रो हीनजन्मभाक्।
श्रूयते यदि ते बुद्धिः शुश्रूषा निरतो भव।। 10
उपदेशो न कर्तव्यः जातिहीनस्य कर्हिचित्।
उपदेशे महान् दोषः उपाध्यायस्य विद्यते।। 11
नाध्यापयेद् बुधः शूद्रं तथा नैव च याजयेत्।
न पाठयेत्तथा शूद्रं शास्त्रं व्याकरणादिकम्।। 12
काव्यं वा नाटकं वापि तथालंकारमेव वा।
पुराणामितिहासं च शूद्रं नैव तु पाठयेत्। 13

अवश्यमिदमतिशयोक्तिपूर्णं वचन वेदो नाध्यापयितव्यः शूद्राय कदाचिदिति श्रूयते, परन्तु काव्यं नाटकं व्याकरणं पुराणमितिहासं च नैव पाठयेदिति गलादधो न प्रयाति। किं चाग्रे श्रूयतां यदि कश्चिदुपाध्यायः शिक्षको वा शूद्रं पाठयति चेत् स नरकं गमिष्यति, हीनयोनिषु असंख्ययुगं यावत

दुःखानि लप्स्यते। किं च स शिक्षको ग्रामाद् बहिष्करणीयः। कीदृशमिदं। यदि कश्चित् शूद्रो येन केनापि प्रकारेण शिक्षितो दश्श्यते स दूरादेव त्यक्तव्य इति शिक्षा स्कन्दपुराणस्येति विस्मयमातनुते।

यदि चोपदिशेद् विप्रः शूद्रस्यैताानि कर्हिचित्।
त्यजेयुः ब्राह्मणा विप्रं तं ग्रामाद् बह्मसंकुलात्।। 14
तथा
शूद्रस्य चोपदेष्टारं द्विजं चांडालवत्त्यजेत्।
शूद्रं चाक्षरसंयुक्तं दूरतः परिवर्जयेत्।। 15

एतादश्शमुद्बोधनं श्रुत्वा दश्ढमतिराश्रमान्नातिदूरे उटजं निर्माय दैवतान्यभ्यपूजयितुमारब्धवान्। अत्रान्तरे सुमतिर्नाम विप्रोऽत्र समायातोऽनेन दश्ढमतिना सत्कश्तो वैदिकं ज्ञानमस्मै प्रददौ। हन्त धन्यवादार्हः पुराणकर्ता, येन ब्राह्मणैस्यक्तस्सन्नयं विप्रः सुमतिर्नरके विनिपातितः।

भुक्त्वा क्रमेण नरकान् तदन्ते स्थावरोऽभवत्।
गर्दभस्तु ततो जज्ञे विड्वराहस्ततः परम्।। 16
जज्ञेऽथ सारमेयऽसौ पश्चाद्वायसतां गतः।
अथ चाण्डालतां प्राप्य शूद्रयोनिमगात्ततः।। 17
गतवान् वैश्यतां पश्चात् क्षत्रियस्तदनन्तरम्।
प्रबलैर्बाध्यमानोऽसौ ब्राह्मणो वै तदाभवत्।। 18

एवं प्रकारेण ब्रह्मराक्षसत्वं गतः स्वपित्रा मुनेरुपदेशाद् वेंकटाचलमानीतः दिनत्रयं यावत् तत्रत्यं जलं पिबन् स्नानं पवित्राम्भसि च कुर्वन् ब्रह्मरक्षसा मुक्तोऽभवत्। मान्याः दश्ढमतिकथासंयोजनस्य प्रयोजनं पापविनाशनतीर्थप्रशंसनमेव आसीत्, तर्हि अन्या काचित् कथा कल्पनीया, कथं जिज्ञासोर्दश्ढमतेः त्यागः कुलपतिना कश्तः, किं च यदि सुमतिना शिक्षा प्रदत्ता तत्र को दोषो यस्य प्रभावात् सुमतिः नरके प्रेषितः? मान्याः इदमेव केषांचिज्जनानां कुकृत्यं यस्य सुफलमधुना ब्रह्मणा आस्वदन्ते।

यदि पुराणरचयितुरयमभिलाषः शूद्राणां शिक्षादीक्षातोऽपसारणमासीत् तदा नैतादृशं लेखनीयम्। परन्तु भवितव्यता बलवती। चौरश्चिह्नं विमुच्य याति।

श्रीमद्भगवद्गीतायां कथितं भगवता चातुवर्ण्यं मया सश्ष्टं गुणकर्मविभागशः। 19

जातिवादबीजवपनकुशला मनुस्मश्तिरपि वक्ति यद् यदा ब्राह्मणो वेदाध्ययनमितिरिच्य किमपि कुरुते तदा शूद्रतां गच्छति।

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।। 20

हन्त! विचित्रमिदं कथं नाभाति? यदि वेदातिरिक्तकर्मसम्पादनेन शूद्रत्वं प्राप्नोति विप्रश्चेत् शूद्रो न कथं वेदाध्ययनेन विप्रतां गच्छेदिति मदीयो वक्तव्यः। अयमेव दोषो यस्मात् महाभारतकाले नियमोऽयं न सम्यक् पालितः। क्वचित् केनचित् शूद्रो न पाठितस्तेन तस्य निन्दनमपि जातमिति श्रूयते। तस्मात् यदि गुणवान् दृढमतिरायातस्तर्हि कुलपतिना ग्राह्य आसीन्न तु हेयः। यदि साम्प्रतमेतादृशं कश्चित् कुर्यात्तथा तस्यावासः कारागार एव कल्पनीयः। मान्याः तीर्थमाहात्यवर्णनाय इयं कल्पना अनुपयुक्ता प्रतिभाति। यदि तीर्थं दर्शनीयं चेन् न मैवं मत्वा पठित्वा वा गन्तव्यमपितु मदुक्तमिदं विज्ञाय विचिन्त्य

शेषभागःषष्टमपुटे

पंचमपुटस्य शेषभागः

## स्कन्दपुराणे तीर्थवर्णनावसरे...

वा प्रस्थातव्यम्। श्रूयताम् अये! कुम्भमहाकुम्भद्वादशज्योतिर्लिंगगणनाशून्यजगदम्बामन्दिरसिद्ध–पीठानि समस्तमपि भारतीयं मानवं पावयन्तीति शास्त्रोक्तिः, परन्तु तत्र–तत्र शास्त्रेषु यदुक्तं तीर्थविषये तद्धिया न अपितु सम्यक् विचार्य पाश्चात्यसभ्यतांगीकरणादश्रद्धालवो गुरुशास्त्रमतोलंघिनोऽभक्ष्याशनदुष्टमतय इदं ब्राह्मणानां पण्डितानां व मायाजालमस्तीति समुद्घोष्य स्वार्थं साधयन्ति, प्रोच्यते तेन न काशीगमनेन नवायोध्यादर्शनेन पापप्रक्षालनसम्भवः, तत्तद्दर्शनस्पर्शनवतामपि क्रौर्यकुत्सितकर्म–

कारित्वसाक्षात्करणात्, तद्वासिनां च बहूनामपि निन्दितकश्त्यसंलग्नत्वादिति। अस्ति काचित्सत्यतापि, परन्तु न पूर्णतया सत्यमिदं वचनम्। वयस्याः! पश्यन्तु अवश्यमेव यावत्कालं तीर्थाटनं तावत्कालिकनिन्दितकर्मकारित्वानुपलब्धेः दुष्टानामपि। किं च महान् नीचोऽपि तीर्थंगतो बिभेति दुष्टकृत्यादिति को न जानाति। यदि प्रतिवर्षं क्रूरा अपि दिवसद्वयं पक्षैकं मासैकं यावत् जहति चौर्यक्रौर्यलुण्ठनापहरणबलात्कारमयानि कृत्यानि तेनापि शान्तिस्तावत्कालिकी कथन्न श्रूयते' गतः स जाल्मः' इति। धन्यमस्मद्पूर्वजा यैरित्थं चिन्तितम्। श्रूयन्तां लाभास्तीर्थगमनेन सखे!

**प्रथमः** सूर्योदय इव सद्विचारोदयः, अमावस्याप्रभावचन्द्रक्षाय इव पापक्षयः, तीर्थाश्रितभिक्षुकविधवा– पंगुजनदशादर्शनजो गश्हद्ानसन्तततितो वैराग्यवश्द्धिः शुक्लपक्षीयचन्द्रवश्द्धिरिव।

**द्वितीयो** बहुजनप्रदेशादेशजनसंगमेन तत्तद्वेशभूषाभाषणादिपरिज्ञानम्।

तश्तीयस्तीर्थस्थले धार्मिकप्रवचनश्रवणसम्पर्क–जनितामन्दानन्दावाप्तिः, कदाचित् सौभाग्यात् सद्वैराग्योत्पत्तिरपि। चतुर्थः क्वचित् क्वचित्तु तीर्थस्थानशुद्धौषधामयवातावरणप्रभावेण भयानकदुस्साध्यरोगोन्मूलनी– करणमपि।

पंचमो निम्नोन्नततीर्थभूमिभागज्ञानेन भौगोलिकपरिज्ञानसंवश्द्धिः, पूर्वश्रुतविस्मयावहतीर्थस्थान–निदर्शनेन तत्कुतूहलपरिशमनं च।

षष्ठस्तीर्थस्थानस्थापितमन्दिरप्रासादवास्तुकलादर्शनं तत्रत्यमैतिहासिकवृत्ताभिज्ञानं च।

सप्तमस्तीर्थस्थलानि बहूनि पर्वतश्रृंखलाश्रितानि नदीतटवर्तीनि च यानि कष्टप्राप्यानि,तत्र तत्र यात्रोत्सवश्रमार्जितशारीरस्थूलतालस्यत्यागः, अत्युतुंगसोपानमार्गावरोहणेन विवशतमुखमार्गेण वायुशुद्धिः, शरीरसर्वसन्धिग्रन्थिस्पन्दो येनानासेन व्यायामलाभः, अहमहमिकया दर्शनौत्सुक्येन परस्परं शक्तिसंधुक्षणम्, निजाभीप्सितार्थयाचनं तीर्थाश्रितदेवेभ्यः, गतिस्थित्यासनव्यवहारज्ञानं चेति तीर्थस्थानगमनेन वर्धन्त एवेति नात्र सन्देहावसरः।

सन्दर्भः


1, द्वितीयवैष्णवखण्डे अ1/56
2, हा हन्त चम्पूकाव्ये तीर्थवर्णने।
3, तत्रैव
4, द्वितीयवैष्णवखण्डे अ1/62
5, तत्रैव 77
6, तत्रैच 81
7, तत्रैव 82
8, तत्रैव 18/43
9, तत्रैव 19/33
10, तत्रैव 19/35
11, तत्रैव 19/36
12, तत्रैव 19/37
13, तत्रैव 19/38
14, तत्रैव 19/39
15, तत्रैव 19/40
16, तत्रैव 19/60
17, तत्रैव 19/61
18, तत्रैव 19/62
19, श्रीमद्भगवद्गीतायां 4/13


तृतीयपुटस्य शेषभागः

# पुराणेषु पर्यावरणविज्ञानम्

महद्योगदानम्। सम्यक्कामसेवनेन जनसंख्यानियन्त्रणं स्वयमेव जायते। अत्यधिककामसेवनात् जनानापाकर्तुं पुराणानि प्रयतन्ते। अस्मिन् विषये जनसंख्याजनितप्रदूषणनिवारणार्थं भागवतोक्तवचनमिदमवधेयम्। यथा–

**नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः।**
**कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत् यावती॥**
**जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः।[10]।**

पुत्रोत्पादनापेक्षया वृक्षारोपणस्य निर्देशः– 'पुत्रेण लोकान् जयति श्रुतिरेषा सनातनी' अनया दृष्ट्या पुत्रोत्पादने जनानां स्वाभाविकी प्रवृत्तिः दृश्यते। जनसंख्यावृद्धिनिवारणार्थं पुत्रोत्पादनपेक्षया वृक्षोत्पादनस्य महत्त्वमधिकं प्रतिपादितम्। यतो हि वृक्षाणां रोपणे प्रवर्धने तस्य प्रवृत्तिर्वर्धते तदा स्वाभाविकरूपेण पुत्रोत्पादनविषये जागरूको भवति। अत एव वृक्षाणां महत्त्वमाधिक्येन स्वीकृतम्।

पर्यावरणसंरक्षणे वृक्षाणां योगदानम्– पर्यावरणस्य संरक्षणे वृक्षाः महत्त्वपूर्णं स्थानं भजन्ते। वृक्षाः नदीनां प्रवाहं प्रदूषणञ्च नियन्त्रयन्ति। वृक्षाणामुपस्थितौ मृत्तिकाप्रवाहोऽवरूद्ध्यते। जलप्लावनसमस्याऽपि न्यूना भवति।

वनाच्छादितक्षेत्राणि वायुमण्डलीयार्द्रतां स्थिरीकुर्वन्ति। ययात्यधिकवृष्टिसम्भावना वर्धते। अनेकेषां पशुपक्षीणां जीवजन्तुनां वन्यजीवानाञ्च कृते आश्रयं प्रदाय पर्यावरण सन्तुलितं कुर्वन्ति। वनौषधीनां प्रयोगेणानेकेषामसाध्यरोगाणामुपचारोऽपि सम्भवति। जलचक्रवायुचक्रयोः सञ्चालने तेषां प्रमुखा भूमिका। इमे प्राणवायोः सञ्चितकोषरूपाः। प्राणवायोनिजनक (कार्बनडाईआक्साईड) वायुमवशोष्य प्राणवायु प्रयच्छन्ति। परोक्षरूपेण विश्वतापनमवरोद्धुमेतेषां महती भूमिका। वृक्षाः भूमेरूर्वराशक्तिं वर्धयन्ति। एतेषां शुष्कपत्राणि मृदौ मिलित्वा जीवाश्मानि जनयन्ति। औद्योगिकप्रदूषणं ध्वनिप्रदूषणञ्च वारयन्ति। पञ्चाशत् टनभारयुक्तः पञ्चाशद्वर्षीयश्च वृक्षो यदि पञ्चाशतद्वर्षपर्यन्तं जीवति तर्हि लक्षरूप्यकाणां योगदानं करोतीति वैज्ञानिकानामभिमतम्। एतादृशानां गुणसम्पन्नानां पर्यावरणसंरक्षणसहायकानां वृक्षाणां संरक्षणे पुराणेषु यच्चिन्तनं तदतीव विशिष्टम्।

वृक्षेऽपि जीवनम्

प्रायशः जना अनुभवन्ति यत् स्थावरा निर्जीवाः चेतनारहिताश्च भवन्ति ते मानवसदृशाः संवेदनशालिनो न सन्ति। किन्तु छेदनकर्तारो न जानन्ति यत् अनेन छेदनकार्येण कीदृशी पर्यावरणीया हानिर्जायते। एतादृशी या प्रवृत्तिः तां वारयितुं वृक्षा अपि सजीवाः तेऽपि दुःखक्लेशादिकमनुभवन्ति, तेषां छेदनेऽपि हिंसा भवतीति पुराणेषु सम्यक् प्रतिपादितम्। यद्यपि आधुनिक भारतीयजीववैज्ञानिक–मूर्धन्येन आचार्यजगदीशचन्द्रवसुमहोदयेन सर्वप्रथमं वृक्षा अपि सजीवा इति स्वप्रयोगैः प्रमाणितं किन्त्वस्मात् पूर्वमपि पुराणज्ञैश्चेदं प्रतिपादितं वर्तते। किन्त्वस्मत्प्रमादात् विस्मृतम्। वृक्षेऽपि जीवनत्वमिति नारदीयपुराणस्य। भृगुभरद्वाजसंवादेनाऽपि ज्ञातुं शक्यते। अत्र भरद्वाजेन भृगु प्रति पृष्टम्– 'यदि पञ्चभिभूतैः जमवत् स्थ अपि जीवनयुक्ता भवन्ति तर्हि तेषां शरीरे पञ्च धातवः कथमोपलभ्यन्ते। ते तु न शृण्वन्ति, न पश्यनि्, न गन्धरसवेदिनः न च स्पर्शं हि जानन्तीति'। अस्मिन् प्रसङ्ग भृगुणा दर्शितं यद् वृक्षेष्वपि जीवनं भवति, तेष्वपि पञ्चधातवो भवन्ति। वृक्षेषु आकाशोऽस्ति। ततः पुष्पफलव्यक्तिरपि जायते। यतो हि तापेन पत्रत्वक्पुष्पफलानि च म्लायन्ते शीर्यन्ते च। अनेन ज्ञायते यद् वृक्षेषु स्पर्शेन्द्रियो विद्यते। यतो हि श्रोत्रेणैव शब्दो गृह्यते वाय्वग्न्यशनिनिर्घोषैः फलपुष्पाणि विशीर्यन्ते। अतः प्रतीयते यत् पादपाः शृण्वन्त्यपि, तथा च लता सर्वान् वृक्षान् सर्वतो वेष्टते सर्वतो गच्छति च। अतः पादपाः पश्यन्त्यपि। यतो हि दृष्टिहीनस्य मार्गबोधो न भवति। पुण्यापुण्यगन्धैर्विविधैर्भूपैश्च वृक्षाः अरोगाः पुष्पिता विनष्टाश्च भवन्ति। अत एव ते जिघ्रन्त्यपि। एतेषां विरोहणं सुखदुःखयोर्ग्रहणं तेषां जीवित्वं प्रदर्शयन्ति। अतः वृक्षाणामचैतन्यत्वं न विद्यते॥11 एतादृशमेव वर्णनं स्कन्दपुराणे ऐतरेयब्राह्मणचरित्रवर्णनप्रसङ्गेऽपि प्राप्यते। अत्र नारदेन प्रतिपादितं यद् वृक्षलतादियोनिष्वपि दुःखं भवति। यथा–

तथा नारकिणां दुःखे प्रसिद्धे किं च वर्यते।
स्थावरेष्वपि दुःखानि दावाग्निर्हिमशोषणम्॥
कुहारैश्छेदनं तीव्र वल्कलानां च लक्षणम्।
पर्वाशाखाफलानाञ्च पातनं चण्डवायुना॥[12]

यद्यपि मांसाहारिणां संख्या विपुला वर्तते। तथाप्यकारणं हिंसावृत्तिर्नभवति बहुजनेषु। तेन वृक्षेऽपि जीवनत्वं, तेऽपि सुखदुःखान्यनुभवन्ति, तेप्यस्माकं सदृशाः संवेदनशालिन इत्येतादृशस्य विचारस्य प्रसारणत॒ वृक्षाणामकारणं छेदनत्वं नियन्त्रितं स्यात्। अनेनांशिकरूपेण वृक्षाणां संरक्षण– कारणात् पर्यावरणस्य संरक्षणमपि भवितुं शक्यते।

**वृक्षेषु देवत्वकल्पना–**

पुराणेषु वृक्षेष्वपि देवानां वासः प्रकल्पितः। स्वाशेन सर्वे देवा विभिन्नेषु वृक्षेषु निवसन्ति। यतो हि भारतीयसंस्कृत्यनुयायिनो देवभीरवो देवपूजकाश्च भवन्ति, अतः वृक्षाणां संरक्षणमालक्ष्य तेषु देवानां वासः प्रकल्पित इति प्रतीयते। वृक्षेषु देववासस्य कल्पना न केवलं पुराणेषु मिलत्यपितु श्रुतिवचनैरस्य पुष्टिर्भवति। यथा– 'अश्वत्थदेवसदनः'[13] 'प्रजापतिर्देवेभ्यो निलायत्, सोऽश्वत्थे संवत्सरं अतिष्ठा'[14] एतादृशानि वचनानि शतपथब्राह्मणेष्वपि प्राप्यते। यथा– ब्रह्म वै पलाशः।[15]

पद्मपुराणेऽप्येकमाख्यानं वर्तते तदनुसारं कोलाहलयुद्धे दानवैः परास्ता देवा वृक्षेषु प्राणरक्षार्थं सूक्ष्मरूपेण प्रविष्टाः तथा तत्रैकाशेन स्थिताः। अत्रैव त्रिदेवानां ब्रह्मविष्णुशिवानां वासोऽपि वृक्षेषु स्वीकृतः। यथा–

पुरा कोलाहले युद्धे दानवैर्निर्जिताः सुराः।
वृक्षेषु विविशुस्तत्र सूक्ष्माः प्राणपरीप्सया॥
अत्र बिल्वे स्थितः शम्भुरश्वत्थे हरिरव्ययः।
शिरीषेऽभूत्सहस्राक्षो निम्बे देवः प्रभाकरः॥
एवमादि यथायोग्यं वृक्षेषु विबुधास्तथा॥[16]
अश्वत्थरूपी भगवान् विष्णुरेव न संशयः।
रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृत्॥[17]

एतादृशमेवान्यदाख्यानं स्कन्दपुराणीयसनत्कुमारसंहितायामपि मिलति। शिवपार्वती–समागम देवकृतविघ्नेन कुपितायाः पार्वत्याः शापेन सर्वे देवाः स्वाशेन वृक्षत्वं प्राप्ताः। यथा–

उपहासः कृतो मेऽद्य फलं तस्य समाप्नुहि।
यावन्त्यः सन्ति देवानां ज्ञातयः सर्व एव ते॥
अजानन्तः स्त्रीसुखानि शाखिनः सन्तु सस्त्रियः॥[18]

वस्तुतःपर्यावरणसंरक्षणमपि प्राणिमात्रस्य संरक्षणार्थमेवापेक्षितं तत्कृते वृक्षाणां महद्योगदानम्। सव वनस्पतयो विशेषेण वटपिप्पलप्लक्षपिचुमन्दादयो दिव्या वृक्षाः प्राणिमात्रस्य स्वास्थ्यलाभार्थम् अतीवोपयोगिनः वयं जानीमः समेषां प्राणिनां शरीराणि विराट्पुरुषस्याङ्गभूतानि ग्रहनक्षत्राणि तस्यांशेनैव विनिर्मितानि।


१. शुक्लयजुर्ववेद 31/1॥
2. श्रीमद्भगवद्गीता 7/4।
३. शुक्लयजुर्वेद 36/17।
४. श्रीमद्भागवते 11/9/28
५.श्रीमद्भागवते।
६. महाभारते शान्ति पर्वणि।
७. श्रीमद्भागवते 6/5/8 तः 38, वायुपुराणे 65/146 तः 156, ब्रह्माण्डपुराणे उपो0 पादे 2/9 तः 29, शिवपुराणे रुद्रसंहितायाम् सतीखण्डे 13/10 तः 40, लिङ्गपुराणे 63/1 तः 30, स्कन्दपुराणे– माहेश्वर (कौमारिका) 54/21 तः 24।।
८. हरिवंशे 1/3/6
9. हरिवंशे 1/3/18–19
१०. श्रीमद्भागवते 1/3/9–10
११. नारदीयपुराणे पूर्वखण्डे 42/63–72
१२. स्कन्दपुराणे– माहेश्वरखण्डे (कौमारिकोपखण्डे) 42/135–136।
१३. अथर्ववेद 6/95/1।
१४. तैत्तिरीये 3/8/12/2।
१५. शतपथब्राह्मणे 5/2/4/18।
१६. पद्मपुराणे उत्तरखण्डे 115/2 तः 4।
१७. पद्मपुराणे उत्तरखण्डे 115/22।
१८. सनत्कुमारसंहिताकार्तिकमाहत्म्ये– 4/32–33।



खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (रिल्ड)
✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204

# श्रीशंकराचार्यसंस्कृतमहाविद्यालयः भारतीयविद्याभवनम् , नवदेहलीप्रतिवेदनम् - वेदसम्मेलनम्


– **श्रीमती लता अरोड़ा**
वरिष्ठा संस्कृताध्यापिका
भारतीयविद्याभवनान्तर्गतः मेहताविद्यालयः
ईमेल –vvlataarora@gmail.com


महतो हर्षस्यविषयोऽयं यदस्य अक्तूबरमासस्य पञ्चमे दिनाङ्के भारतीयविद्याभवनस्य प्राङ्गणे श्रीशंकराचार्य –संस्कृत–महाविद्यालयस्य सौजन्येन वेदसम्मेलनम् समायोजितम्। यथा वयं जानीम एव यत् वेदाः हि ज्ञानविज्ञानयोः अक्षय्याः भाण्डागाराः परमद्यतनीयसमाजेन तु विस्मृतप्रायाःएव। तामेव विस्मृतिं पुनः स्मारयितुं तेन चाक्षय्यभाण्डागारेण अद्यतनछात्राणां परिचयं कारयितुमेवशंकराचार्यसंस्कृतमहाविद्यालयस्य अधिष्ठात्रीणां प्रो. शशिप्रभाकुमारमहाभागानां ,प्राचार्याणां डा. छविकृष्णशास्त्रिमहोदयानां चाविस्मरणीयैः प्रयासैः अतिसफलमायोजनमिदं वस्तुतः एवाद्वितीयतामभजत।



सम्मेलनस्यास्य शुभारम्भः मेहताविद्यालयस्य संस्कृतच्छात्रैः कर्णप्रियस्वरयुतेन वैदिकमङ्गलाचरणेन समभवत् तदनन्तरं च शंकराचार्य – संस्कृत – महाविद्यालयस्य प्राचार्यमहोदयाः श्रीमन्तः आर्यमहाभागाः सभायै सर्वेषामभ्यागतानां परिचयं कारितवन्तः भवनस्य निदेशकमहोदयाश्च ' अतिथिदेवो भव ' इति परम्परां सम्यक् सुपालयन्तः पादपानां समर्पणेन सर्वेषाम् अतिथीनां स्वागतमकुर्वन् सभां संबोधयन्तश्च भवनस्योपलब्धीनां परिचयं सर्वेषां स्वागतपुरस्सरं कारितवन्तः सार्धमेवैतैः महोदयैः संस्कृतस्य संस्कृतेश्च परिरक्षणाय भवनेन क्रियमाणानां प्रयासानामपि विस्तृतं परिचयं सभायै प्रदत्तम्।

निदेशकमहोदयानां स्वागतभाषणानन्तरं देशविदेशेषु प्रथितानां प्रो. शशिप्रभाकुमारमहाभागानाम् अध्यक्षत्वेसम्मेलनमिदं विविधविषयेषु विदुषां सारगर्भितैः व्याख्यानैः समारब्धम्।

सर्वप्रथमम् उद्घाटन – व्याख्यानम् अहमदाबादनगरात् समागतैः गुजरातविश्वविद्यालयस्य विभागाध्यक्षमहोदयैः प्रो. डा. कमलेशकुमारचौकसीमहाभागैः प्रदत्तम्।

एतेषां महाभागानां वर्ण्यविषयः आसीत् –वेदेषु पारिवारिकसंकल्पनाइति द्य स्वकीये सारगर्भिते वक्तव्ये चौकसीमहोदयः स्पष्टीकृतवान् यत् वस्तुतः अद्यत्वे जनसंख्यानियंत्रणाय प्रदत्तं सूत्रम् 'आवां द्वे आवयोः द्वे'इत्येतदेव जनैः परिवारस्य संकल्पनारूपेण कल्पितं परं वास्तविकरूपेण परिवार एतावानेव न भवति अपितु यत्र पितामहः , पिता , पुत्रः पौत्राश्च सर्वे एव मिलित्वा निवसन्ति तत्रैव परिवारः। अद्यत्वे स्वार्थभावनैव परिवाराणां विघटनस्य कारणम् । सामान्यतः मानवजीवनस्य त्रयो विभागा। सन्ति तानि च–व्यक्तिगतजीवनम् , पारिवारिकजीवनम् , सामाजिकजीवनम् च। एतत् त्रिविधं जीवनमेव प्रत्येकं मानवः जीवति । व्यक्तिगतजीवनस्य सामाजिकजीवनस्य च मध्ये सूत्रमस्ति पारिवारिकजीवनम् । एतेन विना अन्ये द्वे जीवनेस्पि नैव सम्भाव्येते। स्वमतं संपोषयितुं वेदेभ्यः अनेकानि उद्धरणानि अपि महोदयैः उद्धृतानि। अन्ते च एते महोदयाः करबद्धप्रार्थनयावदन् यत् यथा माता परिवारे सर्वान् आबालवृद्धान् आवश्यकतानुसारमेव भोजयति न तु गणितस्य गणनानुसारं तथैव अस्माभिरापि विनैव गणनया प्रेम्णैव व्यवहर्तव्यमिदमेव वेदेषुसन्दिष्टम् ।

चौकसीमहाभागानां सारगर्भितं व्याख्यानं भूरि भूरि प्रशंसयद्भिः संयोजकमहोदयैः अध्यक्षीयभाषणाय अधिष्ठात्रीमहाभागाः प्रो. डा. शशिप्रभाकुमारमहाभागाः आमन्त्रिताः। एताः महोदयाः सर्वेषां स्वागतमभिनन्दनं च कुर्वन्त्यः सम्मेलनं मूर्तरूपप्रदानाय संयोजकमहोदयान् प्रशंसयन्त्यः शंकराचार्यमहाविद्यालयस्य गतिविधिभिः सभायाः परिचयं कारितवत्यः। एताभिः बोधितं यदत्र षट्वर्षेभ्यः आरभ्य अशीतिः वर्षपर्यन्ताः जिज्ञासवः संस्कृताध्ययनाय समायान्ति , महाविद्यालयेनानेन संचालितेषु विविधपाठ्यक्रमेषु प्रवेशं संप्राप्य स्वज्ञानपिपासां शामयन्ति। एते पाठ्यक्रमाः सरलसंस्कृतेन , श्रीमद्भगवद्गीतया , वैदिकविषयादिभिश्च संबद्धाः सन्ति। अत्र प्रयोजनमूलकसंस्कृतम् इति पाठ्यक्रमोऽपि गतवर्षादारब्धः। एतदनन्तरं अध्यक्षीयभाषणाय अधिष्ठात्रीमहाभागाम् अभिनन्दयद्भिः स्थालीपुलाकन्यायवदेव चौकसीमहोदयैः मनोरमरूपेण वेदेषु पारिवारिकसंकल्पना प्रकटिता इति कथयित्वा संयोजकमहोदयैः सर्वेस्भ्यागताः , छात्रसहिताः सर्वाः सभाश्च चायपानायामन्त्रिताः।

चायपानानन्तरं द्वितीयसत्रारम्भः संयोजकेन सह सभाभिः गायत्रीमन्त्रोच्चारणेनाभवत् , सत्रस्याध्यक्षत्वं कृतं वेदविदुषा चौकसीमहाभागेन । सत्रस्यास्यारम्भः जवाहरलालनेहरू – विश्वविद्यालयात् समागतानां विदवद्वरेण्यानां प्रो.डा.सुधीरकुमारमहोदयानां व्याख्यानेनाभवत् यस्य विषयश्चासीत् –वेदेष्वीश्वरस्य स्वरूपः। सुधीरमहाभागैः ब्रह्मप्रार्थनया स्ववक्तव्यः प्रारब्धः कथितञ्च यदनेकशः प्रश्नोह्ययमुदेति यत् कः ईश्वरः कीदृशश्च तस्य स्वरूपः – जन्माह्यजन्मा वा ,साकारः निराकारः वा , अवतारो भवतीश्वरस्य न वा। विविधोदाहरणैः स्पष्टीकृतमेतैः महोदयैः यत् वस्तुतः अस्मिञ्जगति सर्वे प्राणिनः स्वाराध्यम् प्रत्यक्षं द्रष्टुमिच्छन्ति। प्रत्यक्षञ्चापि द्विविधम्–बाह्यप्रत्यक्षम् , अन्तःप्रत्यक्षञ्च। इन्द्रियैस्तु बाह्यस्वरूपमेव दृश्यते परमनेकानि वस्तूनि अन्तःप्रत्यक्षानि । सर्वाः नदीः , सर्वान् ग्रहान् , पर्वतान् इत्यादीन् कः गतिशीलान् करोति ? एवमेवास्माकं हृदयेष्वपि विविधावेगानां प्रत्यक्षीकरणम् भवति यथा दानकर्मादिभिः सुकार्यैः आनन्दः ,आवेगः, उत्साहश्च मनस्युत्पद्यते परमेतेषां भावानां वर्णनं शब्दैः असम्भवप्रायः एव। दुष्कर्मणे वयं चतुर्दिक्षु पश्यामः परं न तु सुकर्मणे। यथोक्तं गीतायामपि – ईश्वरः सर्वभूतानां हृद्देशेह्यर्जुन तिष्ठति। यथा तिलेषु तैलं साक्षान्न दृश्यते तथैव ईश्वरस्यापि दर्शनं तस्य कार्यैरेव क्रियते न तु प्रत्यक्षदर्शनेन। सर्वे मिलित्वा यदा 'स्वाहा' कुर्वन्ति तदैव परिवारः यज्ञश्च सफलः। सर्वे भवन्तु सुखिनः–इति प्रार्थनया समाप्तम्आचार्यसुधीरमहाभागैः स्वीयंव्याख्यानम्।

तदनन्तरं गुरुकुल– काङ्गगी विश्वविद्यालयस्य वेदविभागाध्यक्षाः प्रो. डा. रूपकिशोरशास्त्रीमहोदयाः स्वसारगर्भितं व्याख्यानमारब्धुमामन्त्रिताः संयोजकमहोदयैः डा. श्री आर्यमहाभागैः। शास्त्रीमहाभागानां व्याख्यानविषयः आसीत् –वैदिकी भाषा। रूपकिशोरमहोदयः स्वकीयं व्याख्यानं महाराजजनकस्य याज्ञवल्क्यं प्रति कृतेन प्रश्नेन आरब्धवान् यत् अस्तमिते आदित्ये , चन्द्रमसि अस्तमिते , शान्तेह्यग्नौ च किं ज्योतिः– अर्थात् कः प्रकाश्यते ? अस्य प्रश्नस्योत्तररूपेण महर्षिणा याज्ञवल्क्येन कथितं यत् वागेवास्य ज्योतिः , सर्वेषां वेदानामपि वागेवायनम्। वस्तुतस्तु वाक् नैव क्षीयते, दैवी वागेव वेदवाक्। ब्राह्म्या वाचा परमं व्योम दुष्यतिअतः कदापि दुष्टः शब्दः अर्थात् अनुचितभाषाप्रयोगस्तु सदैव परिहार्यः यतः अनेन वातावरणमशुद्धं भवति। वाणी वस्तुतः चतुर्विधा–परा, पश्यन्ती, मध्यमा , वैखरी च। एषा चतुर्विधा वाणी एतैः महोदयैः विविधोदाहरणैः स्पष्टीकृता।

रूपकिशोरमहाभागानामनन्तरम् आमन्त्रिताः मेरठविश्वविद्यालयस्यबड़ोतमहाविद्यालये पूर्वाचार्याः प्रो. डा.वेदपालशास्त्रीमहोदयाः संयोजकमहोदयेन। एते महाभागाः वैदिकदर्शनम्अधिकृत्य स्वविचारान् प्रस्तुतवन्तः। एतैः महोदयैः स्ववक्तव्यस्यारम्भे एव स्पष्टीकृतं यत् यथा कस्यचिदपि शिशोः मनसि विविधाः जिज्ञासाः उत्पद्यन्ते सः चलनारम्भे विविधवस्तूनि स्पृशति भाषणारम्भे च विविधप्रश्नान् पृच्छति वस्तुतः एषा मानवमनोजिज्ञासा तु सृष्टेः आरम्भादेव सर्वत्र। केचन चिन्तयन्ति यत् सर्वप्रथमं सामान्यजिज्ञासाः यूनानदेशीयानां मनस्यागता परमेवं नास्ति । भारतीयं दर्शनं तु धर्मस्य पृष्ठपोषकः। भारतीयदर्शनं विवेचयन्तः तथा चास्तिकदर्शनानां नास्तिकदर्शनानामपि निरूपणं कुर्वाणाः एते महोदयाः कलशे सागरवत् सर्वेषां दर्शनानां दर्शनं कारितवन्तः सभाभ्यः , केवलं चार्वाकदर्शनं विहाय , यतः तत्तु संसारे प्रचलत्येव।

ततः अध्यक्षीयप्रवचनं प्रयच्छन्तः चौकसीमहाभागाः अस्मिन्सत्रे व्याख्यातानां त्रयाणां व्याख्यानानां सारांशं प्रस्तुत्यअधिष्ठात्रीमहोदयाभ्यश्च भूर्जपत्राङ्कितं लेखं समर्पितवन्तः।

सर्वेषां धन्यवादज्ञापनं कृत्वा सर्वे मध्याह्नभोजनाय आमन्त्रिताः।

भोजनानन्तरं तृतीयसत्रारम्भः पुनः गायत्रीमन्त्रोच्चारणेनाभवत्। डा. वेदपालशास्त्रिणाम् अध्यक्षतायाम् अस्य सत्रस्य प्रथमवक्तासीत् चण्डीगढस्थितस्य पञ्जाबविश्वविद्यालयस्यआचार्याः डा.वीरेन्द्रालंकारमहाभागाः। एतेषांव्याख्यानविविषयश्चासीत् वैदिकी समाजसंरचना–एते महाभागाः अग्निमीडे पुरोहितम् , यज्ञस्य देवम् ऋत्विजं , होतारं रत्नधातमम् इति वेदमन्त्रेण स्वव्याख्यानम् आरब्धवन्तः, सार्धमेव तैः पूर्ववक्तारः अपि प्रशंसिताः। स्वकीयव्याख्याने वीरेन्द्रमहोदयाः समाजस्य आरम्भः विद्याकुलादेवामन्यन् यतः समाजेन सह शिशोः साक्षात्कारः सर्वप्रथमं विद्यालये एव भवति। शिक्षावान् विद्यावान् च न समानार्थकौ यतः शिक्षा तु केवलम् साधनमात्रमेव विद्यायाः , अस्मादेव कारणात् एते विद्यालयाः , महाविद्यालयाः इत्यादयस्तु कदापि शिक्षालयाः न कथ्यन्ते। विद्यासमाजेन सार्धमेवैतैः महोदयैः एतदपि स्पष्टीकृतं यत् विवाहोह्यपि समाजाय राष्ट्राय वा न तु आत्मने यतः अनेन सम्बन्धानां विस्तारः भवति। कन्या – दानं न भवति विवाहसंस्थायामपितु कन्या – आदानं , प्रदानं च भवति। स्त्रीणामप्सरत्वमपि वैदिकसंदर्भे आपो वै स्त्रियःइत्युल्लेखमधिकृत्य दयानन्दमहाभागानां मतानुसारं कृतं यत् अप्सरायाः वैदिकं स्वरूपम् – सौन्दर्य–शालीनता–मृदुभाषेत्यादीनां गुणानां संयोगः , अतः एव सुन्दरी स्त्री परं कलहायमाना तु कदापि अप्सरा मन्तुं न शक्यते–वस्तुतः यत्र समानता तत्र समाजः। विघटनं तु तत्रैव भवति यत्र जनाः परस्परं कार्यं

**शेषभागःअष्टमपुटे**

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत–संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई–मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन–चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# जन्मना न कोऽपि ब्राह्मणः एवं न कोऽपि शूद्रः-श्रीमोहनभागवतः

नवदेहली। जतिप्रथायाः विषमतां खण्डितं कृत्वा सामाजिक समरसतां अग्रसारणे संकल्पबद्ध सरसंघसंचालक मोहनभागवतः उक्तवान यत् जन्मना न कोऽपि ब्राह्मणः एवं न कोऽपि शुद्रः भवति,



अपितु सः कर्मणा भवति।

महाभारते तस्योल्लेखः वर्तते यत् कर्म एवं गुणेन रहितः ब्राह्मणं शुद्रवत् कथ्यते। यद्यपति कर्म एवं गुणेनयुक्तः शुद्रोऽपि ब्राह्मण वत् भवति। मोहनभागवतः राष्ट्रिय संग्राहलये अखिलभारतीयइतिहास-संकलनयोजनायाः सचिव बालमुकुन्दपाण्डेय पक्षतः लिखित महामना मदनमोहनमालवीयः व्यक्तित्वं एवं विचारः पुस्तकस्य लोकार्पणस्यावसरे सम्बोधनं कृतमासीत्। विमोचन कार्यक्रमे अखिलभारतीयइतिहाससंकलनयोजनायाः राष्ट्रिय अध्यक्षः प्रो. सतीशचन्द्रमित्तलः, राष्ट्रियपुस्तकन्यासस्य अध्यक्ष डॉ. बलदेवभाईशर्मा एवं राष्ट्रिसंग्राहलयस्य महानिदेशक डॉ.वी.आर.मणि समेत अन्य विशिष्ट जनाः उपस्थिताः आसन्।

भागवतः महामनां राष्ट्रनिर्माता उक्त्वा उक्तवान यत् यदा देशः स्वतन्त्रतायाः पथे आसीत तदा तेषां मनसि भावीभारतस्य स्पष्ट चित्रः आसीत्। येषु भारतस्य राष्ट्रियता प्रमुखमासीत्। परतन्त्रता अनन्तरं अद्य भारतः हिन्दु एवं हिन्दुस्तान अस्ति तर्हि एते महाभागानां कृपया, ये निस्वार्थभावेन स्वजीवनं अर्पितवन्तः। एतादृशं प्रेरणामयी जीवनं सर्वत्र प्रसारणस्य आवश्यकताऽस्ति। अस्माकं राष्ट्रनिर्माणे विवेकानन्द व अम्बेडकर सदृश राष्ट्रनिर्माताायाः स्थानमस्ति। तेषां सक्रियता, शिक्षा, राजनीति व धर्मेन् सह सर्वे आयामः आसीत्।

**सप्तमपुटस्य शेषभागः**

## श्री शंकराचार्यसंस्कृतमहाविद्यालयः.................

कुर्वन्तः उपकारं दर्शयन्ति यत्र सर्वे स्वकार्यं मत्वा कुर्वन्ति तत्र तु संघटनम्। वैदिकसमाजः प्रसन्नतायाः समाजः। मोक्षमूलरमहोदयानुसारं सर्वस्मिन् साहित्ये जनाः विश्वशान्तेः वार्तां कुर्वन्ति , केवलं वेदेष्वेव ब्रह्माण्डस्य शान्तेः वार्ता कृता। एवं वैदिकसमाजस्य संरचनाविषये बहूनि सारगर्भितानि तथ्यानि स्पष्टीकृतानि वीरेन्द्रमहाभागैः।

सम्मेलनस्यास्य अन्तिमं व्याख्यानमासीत् शंकराचार्यमहाविद्यालयस्यअधिष्ठात्रीमहाभागानां प्रो. डा. शशिप्रभाकुमारमहोदयानाम्। एताभिःउप त्वाग्ने दिवे दिवेदोषावर्तस्धिया वयम्। नमो भरन्त एमसिइत्यनेन मन्त्रेण स्वीयं वक्तव्यम् आरब्धम् अपि चवेदानां सार्वभौमसन्देशःइति विषयमभिलक्ष्य स्वमतं प्रस्तुतम्। स्वव्याख्यानस्यारम्भे शशिप्रभामहाभागाभिःतैत्तिरीयब्राह्मणान्तर्गत-इन्द्र-भारद्वाजयोः सम्वादमाध्यमेन स्पष्टीकृतं यत्अनन्ताः वै वेदाःयतो ऋषिभारद्वाजः त्रिषु जन्मसु वेदानधीत्यापि वेदाध्ययनाय चतुर्थं जन्म ऐच्छत्। वस्तुतः वेदस्य व्याख्या तु वेदैरेव कर्तव्या। वेदशब्दस्य निष्पत्तिश्च विद् - सत्तायाम् ,विद्ङ्क ज्ञाने , विद्-विचारणे , विद्लृ - लाभे च ऋग्वेदादिभाष्यभूमिकानुसारं विहिता।

वेदाः तु अपौरुषेयाः , नित्याश्च। एवमेव शब्दार्थसम्बन्धोह्यपि नित्यः। वेदाः तु न सन्ति धार्मिकग्रन्थाः अपितु सार्वभौमिकाः सार्वकालिकाश्च सन्देशाः। एषा कल्याणी वाणी तु सर्वेभ्यः जनेभ्यः अस्ति। सत्यमेव कथितं यत्-

# शिक्षायाः उद्देश्यं जीवनयापनमेव न अपितुव्यक्तित्वनिर्माणमपि - जावडेकरः

नवदेहली। अन्ताराष्ट्रिय कृष्ण भवरामृत संघस्य युवा महोत्सव 2018 उदारे भारतीय संस्कृते विविधता प्रदर्शितवान। मानवीय मुल्ये भारतस्य निर्माण विषये आयोजित कार्यक्रमे केन्द्रियमानवसंसाधनविकासमंत्री प्रकाशजावडेकर मुख्यातिथि रूपे आसन्। अस्मिन्नवसरे ते उक्तवन्तः यत् इस्कॉँन



सम्पूर्ण विश्वे मूल्य उत्थानस्य यं कार्यं करोति सः प्रशंसनीयोऽस्ति।

तेन सह ते मी.टु कैंपन उपरि स्व प्रतिक्रिया दत्तवन्त ते उक्तवन्तः यत् प्रभुपाद स्वामी सर्वदा कथयन्ति स्म चरित्र हानि वास्तविक हानि अस्ति। मी.टु. अभियानेन अवगमनं भवति यत् अस्माकं परितः किं प्रचलति। शिक्षायाः मुख्योद्येश्यं जीविकोपार्जनं न अपितु व्यक्तित्व निर्माणमस्ति।

मोटिवेशनल स्पीकर डॉ. विवेकविन्द्रा युवकान् जीवनमूल्ये सफता प्राप्तकरणाय स्वामी रामदेवस्य उदाहरणं दत्तवान यत् युवकः समाजस्य भविष्योऽस्ति। तेषां चरित्रनिर्माणमपि आवश्यकमस्ति।

कार्यक्रमस्य पूर्वे आयोजित प्रतियोगितायाः विजेतृण जावडेकरः पुरस्कारेण सम्मानितं कृतवान।

# गंगायाः कृते संघर्षरतः स्वामी ज्ञानस्वरूपसानन्दः शरीरत्यागं कृतवान्



ऋषिकेश। गंगारक्षार्थं प्रभावि कानून निर्माणाय गंगायाः अविरलतां आधृत्य 113 दिवसतः तपे स्थित 86 वर्षीय स्वामी ज्ञानस्वरूपसानन्द (प्रो.गुरूदासअग्रवाल) गुरूवासरे देहत्यागं कृतवान। मंगलवासरे तं ऋषिकेश स्थित एम्स अस्पताले जनाः आनीवान। तेषां शरीरे पोटेशियम एवं ग्लुकोज इत्यस्य स्तरे न्युनता आगतवान। अनेन गुरूवासरे तं हृदयाधातो जातः। स्वामी सानन्द एम्स ऋषिकेशं शरीरे समर्पितवान।

सप्तवर्ष पूर्वं मातृसदनस्य एकः अन्य सन्तः निगमानन्दोऽपि अनेन संकल्पेन 114 दिवसस्य तपस्यानन्तरं देहत्यागं कृतवान। मातृसदनस्य परमाध्यक्ष स्वामीशिवानन्दः जिलप्रशासने सानन्दस्य हत्यायाः आरोपं आरोपितवान। आइ.आइ.टी. कानपुरस्य सेवानिवृत प्रो. गुरूदास अग्रवाल अविवाहितः आसीत्। जूनमासस्य द्वाविंशति दिनांके गंगा रक्षणाय प्रभावशाली शासनस्य निर्माणाय जलविद्युतपरियोजनायाः विरोधं कृतवान। तेषां कृते केन्द्रीय मंत्री उमाभारती द्विवारं आगतवती। केन्द्रियमंत्री नितिन गडकरी स्व संदेशवाहकः प्रेषितवान। परञ्च ते अस्वीकारं कृतवन्तः।



**प्रत्यक्षेणानुमित्या वा यस्तूपायं न विद्यते।**
**एनं विन्दति वेदेन तस्मात् वेदस्य वेदता॥**

श्रवणपरम्परया अधिगतम् अतएव वेदः श्रुतिः कथ्यते। वेदादेशस्तु मनुर्भव इति। मनु इत्यस्य शब्दस्य व्युत्पत्तिरेव मत्त्वा कर्माणि सीव्यति इति। संगठनसूक्तश्च सहकारितायाः भावेन संयुक्तस्य परिवारस्य , समाजस्य राष्ट्रस्य वा कल्पनां करोति। यथा पिण्डे तथा ब्रह्माण्डे , यत्र विश्वं भवत्येकनीडम् , विश्वं पुष्टं ग्रामेह्यस्मिन् - इत्यादीनां सर्वेषां वैदिकसमुद्घोषाणां माध्यमेन अनया महोदयया प्रतिपादितं यत् सहृदयत्वम् सांमनस्यम् , सौमनस्यम् संज्ञानम् इत्यादीनां सार्वभौमवैदिकसंदेशानां शान्तसमन्वितजगते महती आवश्यकता वरीवर्ति।

अन्ते च चर्चासत्रमपि आयोजितं यस्मिन् श्रोतृभिःस्वकीयानाम् शंकानां समाधानमपि प्राप्तम्। चर्चानन्तरञ्च संयोजकमहोदयैः सर्वेषामभ्यागतानां धन्यवादज्ञापनेन सह सम्मेलनस्यास्य समाप्तेः घोषणा कृता । शान्तिपाठानन्तरम् सर्वेभ्यश्च शुभकामनाभिः सम्मेलनमिदं सफलतया संपन्नमित्यलं विस्तरेण।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।